No. 82] [*Price Rupee One.*

THE

CHOWKHAMBÂ SANSKṚIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKṚIT WORKS

आख्यातचन्द्रिका

नाम

क्रियाकोशः, श्रीभट्टमल्लविरचितः ।

वैशाखपत्तनीयेन, महामहोपाध्यायश्रीपरवस्तु भगवद्वेङ्कटरङ्ग-
नाथाचार्यार्यवरगुरुपौत्रेण, तत्पादसेवासमधिगतविद्यावैशद्येन
वेङ्कटरङ्गनाथस्वामिना आर्यवरगुरुणा
पदसूच्यादिविन्यासपूर्वकं संशोधितः ।

AKHYATACHANDRIKA

AL EXICON OF SANSKRIT VERBS

BY

BHATTAMALLA

EDITED FOR THE FIRST TIME WITH INDEXES &c.

BY

S. P. V. RANGANATHASVAMI AYYAVARALUGARU
Grandson and grateful pupil of Mahamahopadhyaya Sri Paravastu Bhagavad Venkataranganathacharya Aryavaraguru, Vizagapatam.

PUBLISHED AND SOLD BY THE SECRETARY
CHOWKHAMBÂ SANSKṚIT BOOK-DEPÔT:
BENARES.
AGENTS:--OTTO HARRASSOWITZ, LEIPZIG:
PANDIT JYESHTHARAMA MUKUNDJI, BOMBAY.
Printed By Hari Das Gupta Proprietor
AT THE VIDYA-VILASA PRESS.
BENARES.

1904.

चौखम्बा-संस्कृत-ग्रन्थमाला.

(ग्रन्थ संख्या. २२)

आख्यातचन्द्रिका

नाम

क्रियाकोशः, श्रीभट्टमल्लविरचितः ।

वैशाखपत्तनीयेन, महामहोपाध्याय श्रीपरवस्तु भगवद्वेङ्कटरङ्गनाथा-
चार्यार्यवरगुरुपौत्रेण, तत्पादसेवासमधिगतविद्यावैशद्येन

वेङ्कटरङ्गनाथस्वामिना आर्यवरगुरुणा

पदसूच्यादिविन्यासपूर्वकं संशोधितः ।

काश्याम्

विद्याविलासनाम्नि यन्त्रालये, हरिदासगुप्तेन

संमुद्य प्रकटीकृतः ।

सन् १९०४ ईस्वी.

वैक्रमसंवत् १९६१. शालिवाहन संवत् १८२६.

शुभम् ।

प्रमेयसूची ।

भूमिका ।

वन्दे श्रीपरवस्तुश्रीवासगुरोः पदाश्रितं तनयम् ।
वेङ्कटरङ्गेशगुरुं रामानुजमुनिदयोल्लसितबोधम् ॥

इह खलु जगत्प्रसिद्धासु सर्वास्वपि भाषासु गीर्वाणसंस्कृतादिशब्दैर्व्यवह्रियमाणा आर्यभाषैवातिप्राचीनेति निर्विवादमेव ।

सा च भाषा नामाख्यातादिभेदेन चतुर्धा विभक्ता श्रीमता यास्केन—"तद्यान्येतानि पदजातानि नामाख्याते चोपसर्गनिपाताश्च" इति ।

तत्र सत्वप्रधानानां नाम्नां समाम्नायरूपेणार्थादिबोधका भट्टहलायुधादिप्रणीताः निघण्टुकोशाद्यपरनामधेयाः प्रसिद्धा एव निबन्धाः ।

भावप्रधानानामाख्यातानां समाम्नायरूपेणार्थबोधकाः कोशा बहुभिः प्राचीनैः प्रणीताइति तत्तद्याख्यातृभिः स्वीयग्रन्थेषु प्रमाणतयोपन्यस्तै र्वाक्यैर्ज्ञायते । तत्र च मद्दृष्टिपथं गतास्त्वेते—(१) भट्टमल्लविरचिता आख्यातचन्द्रिका, (२) विद्यानन्दस्य क्रियाकलापः,(३) वीरपाण्ड्यस्य क्रियापर्यायदीपिका, (४) रामचन्द्रस्य क्रियाकोशः, (५) कविसारङ्गस्य ? प्रयुक्ताख्यातमञ्जरी, (६) गुणरत्नसूरेः क्रियारत्नसमुच्चयः, (७) दशबलस्य (वरदराजस्य वा) धातुरूपभेदः (८) हलायुधस्य कविरहस्यम् । तेषु चायमाख्यातचन्द्रिकाख्यः क्रियाकोशो मल्लिनाथादिभिः प्रामाणिकैः व्याख्यातृशिरोमणिभिः प्रमाणीकृतः, यतस्सर्वेष्वपि क्रियाकोशेषु प्रशस्तः । अस्य च कर्ता भट्टमल्लः कतमं देशं कतमं च कालं मण्डयामासेतितिवदानीं न निश्चेतुं शक्यते । परं तु नामलिङ्गानुशासनकर्तुरमरसिंहान्नवीनः, खिस्ताब्दीयचतुर्दशशतकस्थमल्लिनाथात् प्राचीनइति चानुमीयते । यत आख्यातचन्द्रिकायाः काण्डवर्गादिरीतिरमरकोशानुसारिणी, यतश्च आख्यातचन्द्रिकां प्रमाणत्वेनोद्धृतवत्सु मल्लिनाथएव प्राचीनः ।

आख्यातचन्द्रिकाप्रमाणयितारस्त्वेतेः—(१) मल्लिनाथसूरिः, (२) अमरकोशटीकासर्वस्वकारोवन्द्यघटीयस्सर्वानन्दः,(३) मल्लिनाथसूरिसूनुः कुमारस्वामी, (४) कविकल्पद्रुमव्याख्याता दुर्गादासः, (५) अभिज्ञानशाकुन्तलव्याख्याता राघव-

भट्टः, (६) रामायणचम्पूव्याख्याता रामचन्द्रः (७) मनोरमाकृद्भट्टोजीदीक्षितः (८) सटीकराघवनैषधीयकाव्यकर्ता हरदत्तसूरिः ।

आख्यातचन्द्रिकां मुमुद्रयिषुभिः श्रीमद्भिरस्मत्पितृचरणैः सर्वशास्त्रस्वतन्त्रधिषणैः प्रातःस्मरणीयनामधेयैः श्रीनिवासजगन्नाथस्वामिभिरार्यवरगुरुभिः लिङ्गं वंशोद्भवबहुभाषावैज्ञानिकलक्ष्माजीपण्डितस्य उत्कलमातृकायाः आन्ध्राक्षरेषु पुत्रिका लेखितुमारब्धा, तेषु परमपदमलङ्कुर्वाणेषु मयासम्पूरिता । मुमुद्रयिषति च मयि मधुरेशपुर(Madras)स्थराजकीयप्रधानपाठशालासंस्कृतोपाध्यायः(Professor of Sanskrit, Presidency College) राजकीयप्राचीनलिखितपुस्तकालयाध्यक्षः(Curator, Government Oriental Mss. Library)एम. ए. उपपदधारी श्रीशेषगिरिशास्त्री १८९३—९४ वत्सरीयविज्ञापनायां(Report of a search for Sanskrit and Tamil manuscripts for the year 1893–94.)आख्यातचन्द्रिकाविषयिणीं स्वीयां मुमुद्रयिषा मेवं व्यक्त्यकरोत्:—Akhyatachandrika is a short treatise on verbs written by Bhattamalla. I have not seen the work noticed in any of the catalogues of Sanskrit manuscripts published in India or elsewhere. ** From the above description, it will be clearly seen that the work will be a very useful guide to the students learning Sanskrit and has a high educational value in consideration of which I intend editing it with notes and making it accessible to students studying Sanskrit in schools and colleges in this Presidency.ततोमत्पुस्तकेनापि प्रोत्साहयितुकामः पत्रमेव मलिखम्:—I see from your report on manuscripts that you are just going to get printed Akhyatachandrika of Bhattamalla with index and notes so that it may be useful for students. Sometime ago I got a manuscript of the same in Uriya character and have translated it into Telugu with the object of getting it printed myself. Now as you have

undertaken to do that work with additions which may be great used to students. I have the honor to write you I am ready to send the manuscript if you think it worth your perusal.तदुपरि तत्प्रेषितं प्रत्युत्तरम्:—Many thanks to you for your kind letter. I shall be much obliged to you if you send the Telugu transcript which you have made from the Uriya Ms. of the Akhyatachandrika of Bhattamalla. I have already secured three copies of the work from the three different countries, Salem, Kumbakonam and Mysore. Your transcript which comes from the Uriya Ms. must be very important. *** (25th. June 1900). ततो मत्पुस्तकस्य प्रतिकृतिः प्रेषिता । सोऽपि तत्प्राप्तिमनुमोदयन्नेवमलिखत्:—Many thanks to you for the copy of the Akhyatachandrika, which you were kind enough to send me and also for the careful collation you made of the transcript with the original. ** The work will be printed with an introduction, wherein I shall express my obligation to you for the good copy which have kindly secured for me. (29th. January 1901).

एवं न्यस्तभरेऽपि मयि दैवदुर्विपाकेन तस्य स्वर्गवासेन तत्रापि विघ्नमनुभूय पुनरपि मय्येवाविशदाख्यातचन्द्रिकामुद्रणभारः । शेषगिरिशास्त्रिसमीपप्रेषितमन्मातृकाविषये तत्पुत्रसकाशे पत्रद्वारा स्वयं गत्वा च कृतोऽपि यत्नः न फलेग्राहिरभूत्। 'पुस्तकं वनिता वित्तं परहस्तगतं गतम्' इति ह्याभाणकः ।

नानाविधापूर्वमहाग्रन्थसम्पादनरसिकस्य काशीस्थस्यास्मन्मित्रवर्यस्य श्रीगोविन्ददासमहोदयस्य प्रेरणया चौखम्बासंस्कृतपुस्तकमालाध्यक्षोऽनेकापूर्वमहानिबन्धप्रकाशनरसिकः श्रेष्ठिश्रेष्ठः श्रीहरिदासगुप्तः स्वीयपुस्तकमालायामेनामाख्यातचन्द्रिकां प्रचिकाशयिषुर्मय्येव शोधनभारं न्यधादिति दूरदेशस्थो विघ्नैर्मुहुर्मुहुः प्रतिहन्यमानोऽप्यहमेतत्कार्यसम्पादनाय प्रावर्तिषि ।

एतन्मुद्रणाधारभूता मातृकास्त्वेताः—

१ श्रीलिङ्गवंशोद्भवानेकभाषावैज्ञानिकलक्ष्माजीपण्डितस्योत्कलाक्षरमयी तालपत्रमातृका । एतत्पठने श्रीमता महाराज—श्रीविक्रमदेववर्मणाऽस्मन्मित्रप्रकाण्डेन यः सहायो ऽकारि तदुपकारवर्णनेऽशक्तस्तं महाराजमनामयदीर्घायुष्ट्वाशिषा योजयामि ।

२ श्रीविजयनगरमहाराजांग्लपाठशालासंस्कृतप्रधानोपाध्यायस्य मेडेपल्लिवेङ्कटरमणपण्डितस्य मातृका आन्ध्राक्षरमयी ब्रह्मचेष्टावर्गान्ता.

३ मैसूरराजकीयप्राच्यकोशागार(Mysore Govt. Oriental Library)स्था १०९ सङ्ख्याका कर्णाटलिपिलिखिता प्रथमपत्ररहिता प्राचीनकागजपत्रमयी । एषा च तत्कोशागाराध्यक्षस्य वि.ए.उपपदधारिणोऽस्मन्मित्रवर्यस्य श्रीमहादेवशास्त्रिणः कृपया यावत्संशोधनमस्मन्निकटे स्थापितेति तन्महाशयस्योपकारं वर्णयितुमक्षमः तस्य धन्यवादं प्रकाशयामि । तस्य चान्ते "रौद्रिसंवत्सरअधिकआश्वीजमासे सितपक्षे द्वितीयाइन्दुवासरे ...रुनगरस्थितसञ्जीवय्यपुत्रकेशवप्पेन लिखितम्" इति लेखनसमयो वर्तते ।

एतन्मातृकात्रयाधारेणैकां पुत्रिकां निष्पाद्य, आख्यातमञ्जरी—क्रियाकोश—कविकल्पद्रुम—धातुपाठ—धातुवृत्ति—कविरहस्यादिग्रन्थसहायेन यथामति संशोध्य च तदनुसारेणैषा मुद्रणा निरवर्त्यतेति शम् ।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति साधवः ॥
गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेलाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥

विशाखपत्तनम्
१—९—०४

इति विज्ञापयति
वेङ्कटरङ्गनाथस्वामी.

॥ श्रीः ॥

प्रशस्तिश्लोकौ ।

श्रीमतो भट्टमल्लाख्यान्निःसृतैषा कलानिधेः ।
विद्वच्चकोरैरास्वाद्या भवत्वाख्यातचन्द्रिका ॥ १ ॥
त्रयीमूर्तेर्भगवतः संप्रवृत्ता प्रसादतः ।
त्रैलोक्यचक्षुर्भूतस्य तस्य प्रीत्यै प्रकल्पताम् ॥ २ ॥

॥ श्रीमते हयग्रीवाय नमः ॥

॥ नमः परमर्षिभ्यः ॥

भट्टमल्लविरचिता ।

आख्यातचन्द्रिका ॥

प्रथमकाण्डः ।

भूवार्याविभक्तये पुरुषत्रयमूर्तये ।
सदाख्यातपदायास्मै परस्मायात्मने नमः ॥ १ ॥
संस्मृत्य गुरुपादाब्जे भट्टमल्लेन रच्यते ।
व्युत्पित्सूनां प्रमोदार्थमेकार्थाख्यातपद्धतिः ॥ २ ॥

अथ भावविकारवर्गः ॥

(१) सत्तायामस्ति भवति विद्यते (२) चाथ जन्मनि ।
उत्पद्यते जायते च प्ररोहत्युद्भवत्यपि ॥ ३ ॥
निर्वर्तते संभवति (३) सिद्धौ सिध्यति राध्यति ।
निष्पद्यते च राध्नोति साध्नोति फलतीति च ॥४॥
(४) वर्तते तु वसत्यास्ते ध्रियते चावतिष्ठते ।
क्षियति स्थलति स्थित्यां मठत्यपि च तिष्ठति ॥५॥
(५) जीवे वलत्यूर्जयति श्वसित्यनिति जीवति ।
प्रन्यते-ऽथ प्राणिति च समनित्युदनित्यपि ॥ ६ ॥
व्यनित्यपानिति प्राणवृत्तिष्वाख्यातपञ्चकम् ।

(६) कृच्छ्रजीवे क्षञ्जयति कठत्यातङ्कति त्रयम् ॥७॥
(७) परिणामे परिणमत्यात्मने ऽपि विवर्तते ।
संपद्यते कल्पते (८) ऽथ वृद्धौ बृंहति वर्धते ॥८॥
आप्यायते स्फायते च श्वयत्यृध्नोति वर्हति ।
आपूर्यते पुष्यति च पोषत्यृध्यति पूषति ॥ ९ ॥
वंहते मंहते मेध्यत्येधते च विपोलति ।
नीवत्यपि स्थूलयते तथा पीवति मीवति ॥१०॥
महीयते च वठति विपोलयति तीवति ।
ऋमते प्यायते स्फीतीभवति प्रथते ऽपि च ॥११॥
ऋम्यते प्रसते तौति तवीति च्छान्दसौ क्वचित् ।
(९) स्फुटति स्फोटते फुल्लत्युन्मीलत्यपि पुष्प्यति ॥१२॥
विजृम्भते विकचते विकासे विकसत्यपि ।
(१०) मीलति स्मीलति क्ष्मीलत्येते संकुचतीति च ॥१३॥
कूणयत्यपि संकोचे मुकुलीभवतीति षट् ।
(११) अथो जरायां जरति सप्त जीर्यति झीर्यति ॥१४॥
जूर्यते जारयति च जिनाति च जृणाति च ।
(१२) दलति स्फोटति विशीर्यते फलति शीयते ॥१५॥
द्राडते ऽमी विशरणे ध्राडते चाष्ट सीदति ।
(१३) अल्पत्वे लिश्यते कृश्यत्यमी ह्लसति चुण्डते ॥१६॥
चत्वारो (१४) ऽथ दरिद्राति व्यृध्नोति व्यृध्यतीत्यपि ।
दरिद्रत्वे त्रयो (१५) ऽथापक्षीयते चापि दीयते ॥१७॥
अपक्षये जायति चापक्षयत्यपि दस्यति ।
तस्यत्यपि क्षायति च सायतीति पदाष्टकम् ॥१८॥
(१६) सप्त प्रध्वंसते ऽप्येति विनश्यति विलीयते ।
प्रलीयते विनाशे ऽमी स्यु रिष्यति विपद्यते॥१९॥

(१७) परैति प्रैति मरणे म्रियते च प्रमीयते ।
संतिष्ठते समाप्नोति विरमत्यारमत्यपि ॥२०॥
पर्यवस्यत्युपरमत्यात्मनेपदसंस्थितौ ।
(१८) निर्वाति निर्वापयति विध्यायत्युद्रायतीति च ॥२१॥
उद्राति शाम्यतीत्येते तेजसो विरतौ तु षट् ।
इति भावविकाराः षट् सभेदाः प्राय ईरिताः ॥२२॥

इति भावविकारवर्गः ।

अथ बुद्धिवर्गः ॥

(१) स्फूर्तौ सम्राविरस्त्याविर्भवति प्रादुरस्ति च ।
प्रादुर्भवति निर्भाति स्फुरति प्रतिभासते ॥२३॥
(२) वेत्ति जानाति जानीते वेद बोधति बुध्यते ।
निबोधते चेतयते मन्यते प्रतिपद्यते ॥२४॥
प्रेक्षते पण्डते प्रत्येत्यवगच्छति चेतति ।
मनुते चोपलभते वेति वेदयतेऽश्नुते ॥२५॥
ज्ञाने मानयते संवेत्त्यात्मनेऽयमकर्मकः ।
गृह्णात्यपि च गृह्णीते चिकेत्ति च चिकेति च ॥२६॥
एतौ छन्दसि केषां चित् ज्ञानार्थाः षट् च विंशतिः ।
धातू च नीवदी ज्ञानविषयौ स्तः क चिद्यथा ॥२७॥
विद्यासु नयते प्राज्ञो वदते तासु पण्डितः ।
(३) चित्तेमनस्युरसितः करोति कुरुते परे ॥२८॥
मनसा गोचरीकारे (४) मनस्वित्वे मनस्यति ।
(५) मेधायति तु मेधायां त्रयं मेदति मेदते ॥२९॥
(६) विभ्राम्यति विपर्येति विपर्यस्यति विभ्रमे ।
भ्रमति भ्राम्यतीत्येते (७) विमतौ तु विमायति ॥३०॥
विमन्यते विवदते तथा विप्रतिपद्यते ।

(८) संशये पश्च संदेग्धि संदिग्धे विचिकित्सति ॥३१॥
संशेते च विशेते च(९)वितर्कयति तूहते ।
मीमांसते स्यमयते वितर्के विमृशत्यपि ॥३२॥
विन्ते चोत्पश्यति परामृशत्युत्प्रेक्षते तथा ।
तावप्युपालोचते द्वौ पर्यालोचतइत्यमू ॥३३॥
विचारयति संपृच्छत्यात्मने ऽयमकर्मकः ।
संप्रधारयतीत्येते समर्थयतइत्यपि ॥३४॥
(१०) शङ्कायां रगतीति स्याद्रेकते शङ्कते त्रयम् ।
(११) संभावयति तुल्यार्थाववकल्पयतीत्यमू ॥३५॥
(१२) विस्रम्भते तु प्रत्येति विश्वसित्याश्वसित्यपि ।
श्रद्धत्ते श्रद्दधातीति विश्वासे प्रश्वसित्यपि ॥ ३६ ॥
(१३) विवेके तु विवेवेक्ति विविनक्त्यात्मने ऽप्यमू ।
(१४) निश्चिनुते निर्णयते निर्णयति च निर्णये ऽध्य वस्यति च ॥३७॥
निष्टङ्कयति च सप्त च निर्धारयतीह निश्चिनोति स्युः ।
(१५) संकल्पयति संकल्पे ऽभिसंधत्तउद्दीक्षते ॥ ३८ ॥
(१६) लक्षीकरोत्युद्दिशति चोद्देशे ऽपदिशत्यपि ।
साक्षात्करोत्यात्मने ऽपि प्रत्यक्षे ऽध्यक्षयत्यपि ॥३९॥
साक्षयत्यपि चाध्यक्षीकरोत्यनुभवत्यपि ।
(१७) मिमीते मीयते माति मिनोति मिनुते तथा ॥ ४० ॥
प्रमानुमोपमासु स्युः प्रानूपादीन्यनुक्रमात् ।
(१८) ध्याने चिन्तयति ध्यायत्यमी भावयति त्रयः ॥४१॥
(१९) स्मरणे त्वभिजानाति स्मरत्यध्येति च त्रयम् ।
(२०) प्रतिजानाति चोत्कण्ठत्युत्कण्ठयति मण्ठते ॥ ४२ ॥
उत्कण्ठते चोत्कण्ठायामाध्यायत्युन्मनायते ।
(२१) दैवं पर्यालोचयतीत्यर्थे राध्यति चेष्टते ॥ ४३ ॥

(२२) प्रत्यभिजानात्यभिसंधत्तेऽप्यनुसंदधाति समाः ।
प्रतिसंधत्ते प्रत्यवमृशति प्रतिसंदधातीति ॥ ४४ ॥
(२३) विस्मृत्यां विस्मरति च स्पूर्छति प्रस्मरत्यपि ।
(२४) मोहे विचेतीभवति विमुह्यति च मूर्छति ॥ ४५ ॥
युप्यत्यष्टौ विलुभति रुप्यत्यृच्छति लुप्यति ।
(२५) प्रयुच्छति स्रम्भते चानवधाने प्रमाद्यति ॥ ४६ ॥
विमनीभवतीति स्युः पञ्चामी विमनायते ।
(२६) समादधात्यवदधात्यमी प्रणिदधाति च ॥ ४७ ॥
आत्मनेऽपि त्रयं शीलत्यवधाने (२७) ऽथ संश्रवे ।
आशृणोति प्रतिशृणोत्यभ्युपैत्यभ्युपेयते ॥ ४८ ॥
आतिष्ठते ऽवगिरते प्रतिजानीतइत्यपि ।
सङ्गिरते संशृणोतीत्यात्मनेऽयमकर्मकः ॥ ४९ ॥
समादधात्यात्मने ऽपि मुणात्यभ्युपगच्छति ।
(२८) उरर्यंग्यूर्यूररीभ्यः करोति कुरुते परे ॥ ५० ॥
प्रसौत्यभ्यनुजानाति प्रसवत्यनुमन्यते ।
शूषति स्मानुमनुते ऽप्यनुज्ञाया (२९) मथेक्षणे ॥५१॥
निर्वर्णयति निध्यायत्यालोकयति पश्यति ।
आलोकते लक्षयते निभालयतईक्षते ॥ ५२ ॥
निरूपयत्यपि निशामयते च विचायति ।
विवलत्यात्मने ऽपि द्वौ लक्षयत्यपि लोचते ॥५३॥
चष्टे छन्दसि सम्पश्यत्यात्मने स्यादकर्मकः ।
(३०) शृणोत्याकर्णयति च तद्वन्निशमयत्यपि ॥५४॥
निशाम्यतीति श्रवणे (३१) घ्राणे जिघ्रति शिङ्घति ।
(३२) स्पृशत्यामृशति स्पर्शे छुपत्यालभते च षट् ॥५५॥
स्पशति स्पशते (३३) लेढि त्वास्वादे रसयत्यपि ।

लागयत्यास्वादयति लीढे राकयतीति षट् ॥५६॥
इति बुद्धिवर्गः ।

अथ अन्तःकरणवृत्तिवर्गः ।

(१) लषते लष्यति लषत्याशास्ते माङ्क्षतीप्सति ।
आकाङ्क्षति स्पृहयति नाधते वष्टि वाञ्छति ॥५७॥
आशंसते कामयते लष्यते वाङ्क्षतीच्छति ।
लिप्सते हर्यतीच्छायां खटत्यप्यनुरुध्यते ॥५८॥
विंशतिः स्यु (२) र्भृणायते त्वपि लुभ्यति गृध्यति ।
ककते चार्थयति च गार्ध्न्ये षट् स्युर्धनायति ॥५९॥
(३) क्रमते क्रम्यते यस्यत्युद्युङ्क्ते चोत्सहत्यपि ।
आराधयत्युत्सहतएषते संयसत्यपि ॥६०॥
यसत्यपि प्रयतते संयस्यति च जेहते ।
वेहते षोडशोत्साहे वाहते ऽमी व्यवस्यति ॥६१॥
(४) विप्रीयते ऽपरजति द्वेष्टि द्वेषे ऽपरज्यति ।
विरुणद्धि विगृह्णाति पञ्चामी चात्मनेपदे ॥ ६२ ॥
(५) वैरायते स्पर्धते च (५) विराध्नोत्यभ्यसूयति ।
सूक्ष्यतीक्ष्यतिं चेर्ष्यायामीर्ष्यत्यपि च भर्त्स्यते ॥६३॥
(६) मोदते ह्लादते माद्यत्यानन्दति च तुष्यति ।
हृष्यति प्रीयते निर्वात्यपि नन्दति तृपते ॥ ६४ ॥
निर्वृणोत्यात्मने सुखयत्येते प्रीतौ सुखायते ।
प्रचेतीभवतीत्येवं प्रमनीभवतीति च ॥ ६५ ॥
सुमनायतइत्येवं सुमनीभवतीत्यपि ।
(७) ह्रियां ह्रीच्छति जिह्रेति लज्जते च हृणीयते ॥ ६६ ॥
व्रीड्यति त्रपते मन्दाक्षयत्यप्यष्ट लज्जते ।
(८) विभेति त्रस्यति दरत्येवं त्रसति भेपते ॥ ६७ ॥

विनक्ति भ्यसते चैव दर्भयत्यपि दर्भति।
भेपत्युद्विजते भीत्यां व्यथते द्वादशेरिताः ॥ ६८ ॥
(९) तितिक्षते ऽधिकुरुते क्षान्तौ सहति सह्यति।
मृष्यतीदं मर्षति चेत्यात्मने ऽपि चतुष्टयम् ॥ ६९ ॥
क्षाम्यत्येवं क्षामयति क्षमते परिमृष्यति।
तथा मर्षयति क्षम्पयति साहयतीति च ॥ ७० ॥
(१०) अवधीरयति यातयत्यवजानाति हेडते।
विमानयत्यट्टयति सुट्टयत्यवमन्यते ॥ ७१ ॥
होडते हिण्डते रौडत्येते शेटति सेटति।
करोत्यधस्तिरोभ्यां चात्मनेऽवगणयत्यपि ॥ ७२ ॥
अनादरे स्माययते तथा परिभवत्यपि।
मङ्क्ते त्वात्मने विप्रकरोति निकरोति च ॥ ७३ ॥
त्रयो ऽतिसंदधात्येते (११) विचति च्छलयत्यपि।
प्रलोभयत्यपि शठत्युल्लापयतइत्यपि ॥ ७४ ॥
दभ्नोति विप्रलभते प्रतारयति वञ्चने।
अमी वञ्चयते गर्धयति (१२) चाथ जिघांसने ॥ ७५ ॥
जिघांसति द्रुह्यति चापराध्नोत्यपराध्यति।
अपराध्यत्यपकरोत्येते ऽपकुरुते ऽपि च ॥ ७६ ॥
चिरिणोति रिणोत्येवं क्षिणोति जिरिणोति च।
दाश्नोति च दृणोत्याहुः पदानि च्छान्दसानि षट् ॥ ७७ ॥
(१३) कुप्यति क्रुध्यति क्रोधे भामते भामयत्यपि।
चण्डते रोपयति च मन्तूयति च रुष्यति ॥ ७८ ॥
गुध्नात्येवं संरभते ऽथो गृह्णात्यात्मने ऽप्यदः।
आग्रहे ऽभिनिविशते (१४) कृपायां करुणायते ॥ ७९ ॥
कृपायते चानुकम्पते ऽनुक्रोशत्यृतीयते।

घृणायते च दयते कृपते ऽभ्युपपद्यते ॥ ८० ॥
प्रसीदत्यनुगृह्णाति चात्मने ऽयं (१५) विषीदति ।
शोचतीति च शोके द्वे(१६)त्रयो ऽनुशयवाचिनः ॥८१॥
अनुशेते ऽनुतपति स्युर्विप्रतिसरत्यमी ।
(१७) कन्दति क्रन्दति क्रन्दत्यस्रयत्यपि रोदिति ॥८२॥
बाष्पायते विलपति तेवते परिदेवते ।
क्रोशति क्लिन्दते क्लिन्दत्येते द्वादश रोदने ॥८३॥
(१८) अनुरज्यत्यनुरजत्यात्मने मिन्दयत्ययम् ।
(१९) मेद्यति स्निह्यति स्नेहे प्रीयते सप्त मेदते ॥८४॥
गर्वे ऽभिमन्यते गर्वयते कर्वति खर्वति ।
हृष्यति स्माभिमनुते गर्वत्युद्यति दृप्यति ॥८५॥
क्षीवते शौटति कडत्यपि हर्षति कण्डते ।
माद्यत्यहंकरोत्यात्मने(२०)ऽप्युन्मादे तु लोडति ॥८६॥
म्लेटत्युन्माद्यति म्रेडत्येते लेट्यति लोट्यति ।
(२१) ताम्यति श्राम्यति ग्लानौ खिन्ते खिन्दति खिद्यते॥८७॥
ग्लायति क्लाम्यति परिम्लायति क्लामतीति च ।
निर्विद्यते चोपति च ग्लेपते (२२) ऽप्यथ दूयते ॥८८॥
क्लिश्यते व्यथते तंतस्यति पम्पस्यतीति च ।
दुःखायते दुःख्यति च दुःखे कृच्छ्रायते ऽष्टकम् ॥८९॥
(२३) वीभत्सते च वीभत्से जुगुप्सत इतीर्यते ।
(२४) प्रमीलतीति तन्द्र्यां स्याद् घूर्णते प्रचलायते ॥९०॥
(२५) जम्भते जृम्भते चापि जृम्भे जंजभ्यते त्रयम् ।
(२६) शेते द्रायति निद्राति संसस्ति स्वपितीति च ॥९१॥
निद्रायते संविशति निद्रायां संस्ति मन्दते ।
(२७) वलते परिवृत्तौ स्याद् घोटते परिवर्तते ॥९२॥

(२८) प्रबुध्यते च जागर्ति द्राहते जागरे त्रयम् ।
इत्यन्तःकरणवृत्तिवर्गः ।

अथ वाक्क्रियावर्गः ॥

(१) आचष्टे वक्ति वदति रपत्याख्याति भाषते ।
ब्रूते ऽभिधत्ते गदति व्याहरत्यपि जल्पति ॥९३॥
ब्रवीत्यभिदधाति व्याहरते कथयत्यपि ।
गृणात्युदीरयत्युक्तौ कीर्तयत्यालपत्यपि ॥९४॥
भणत्यपि वचत्येके वाचयत्यपि शंसति ।
(२) पठत्यधीते ऽध्ययने चर्चयत्यपि चर्चति ॥९५॥
आमनत्युपयुङ्क्ते च गमयत्यपि शिक्षते ।
(३) शिक्षणे ऽध्यापयति च शिक्षयत्यनुशास्ति च ॥९६॥
(४) वेदमाचष्टइत्यर्थे वेदापयति संमतम् ।
(५) संस्तौत्यभ्यस्यति परिचिनोतीत्यात्मने ऽप्यमी ॥९७॥
स्युः शीलयति च गुणयत्याम्रेडयति शीलने ।
(६) सत्यापयति सत्योक्तौ(७)कुन्द्रयत्यनृतोदिते ॥९८॥
(८) असम्यगुक्तौ शठयत्येवं श्वठयति द्वयम् ।
(९) अपशब्दयति म्लेच्छत्यपभ्रंशयतीत्यपि ॥९९॥
म्लेच्छयत्यपशब्दे स्युरपभाषतइत्यमी ।
(१०) स्खलति भ्रेषति भ्लेषत्यन्यत्वे ऽन्यथयत्यपि ॥१००॥
(११) मिथ्याकारयते त्वेतदन्यथात्वे ऽसकृत्कृते ।
(१२) शपते शप्यति शपत्याक्रोशत्यपि शप्यते ॥१०१॥
वेटत्याक्रोशने ऽमी षडथ (१३) मिथ्याभिशंसने ।
अभ्याख्यात्यप्यभिशपत्यभ्याचष्टे ऽभिशंसति ॥१०२॥
(१४) जुगुप्सते वाचयति प्रवदत्यपि गर्हते ।

२

त्वयः क्षिपत्यात्मने ऽपि चोपक्रोशति निन्दति ॥१०३॥
निसः परेश्च वदति गल्हत्यपि च गल्हते ।
निंदायां स्युः कुत्सयते क्षिपत्यपकरोत्यमी ॥१०४॥
(१५) भर्त्सयते तर्जयते संतर्जति लजति लाजति च ।
लंजति लांजति तुल्याः तर्जयति च दृश्यते कविषु॥१०५॥
(१६) प्रतिभिन्ते प्रतिभिनत्त्युपालभतइत्यपि ।
उपालम्भे(१७)सनिन्दे तु परिभाषतइत्यदः ॥१०६॥
(१८) स्तौति स्तुते नुवति नौति पनायतीट्टे
स्तुत्याम्नृचत्यपि पणायति च स्तवीति ।
स्युर्वन्दते ऽर्कयति चेडयति प्रशंस-
त्येतानि पञ्चदश दीव्यति मन्दते च ॥१०७॥
(१९) कत्थते स्तोमयति च श्लाघते शाडते ऽपि च ।
शीभते शल्भते शाठयते स्युस्सप्त कत्थने ॥१०८॥
(२०) कवते वर्णयति च कवित्वे कवयत्यपि ।
(२१) उपश्लोकयतीत्येतच्छ्लोकोपस्तवनार्थकम् ॥१०९॥
(२२) यज्ञेषु शंसतीत्यृग्भिः(२३)स्तुते स्तौतीति सामभिः ।
(२४) शास्त्रे* प्रतिगृणातीति प्रोत्साहे ऽनुगृणाति च॥११०॥
(२५) स्यात्प्रत्यभिवदत्याशीर्वादआशास्तइत्यपि ।
(२६) निबध्नाति ग्रन्थति च ग्रथ्नाति श्रन्थयत्यपि ॥१११॥
श्रन्थति वटयत्येवं पटयत्यपि गुम्फति ।
गुफत्येकादश ग्रन्थे दृभति ग्रन्थयत्यपि ॥११२॥
(२७) समाहरति संक्षेपे संगृह्णाति समस्यति ।
संक्षिपत्यात्मने ऽप्येते संक्षिप्यति तनक्ति च ॥११३॥
यन्त्रयत्यपि संक्षिप्तावष्ट कृणायते ऽप्यमी ।

---

* शास्त्रे शास्त्रसंबन्धिनि । प्रोत्साहे इत्यस्य विशेषणमेतत् ।

(२८) विस्तृणोति व्यस्यति च विस्तृणात्यातनोति च ॥११४॥
चत्वारस्त्वतिविस्तारे (२९) पञ्चते पञ्चयत्यपि ।
व्याकरोति व्याकुरुते व्याचष्टेऽर्थापयत्यपि ॥११५॥
व्याख्याति स्पष्टयति च व्यनक्ति व्यञ्जयत्यपि ।
करोति प्रादुराविर्भ्यां विवृणोत्यात्मनेप्ययम् ॥११६॥
प्रकाशने प्रकथयत्येते लक्षयतीत्यपि ।
तिष्ठते घोषयति च विशब्दयति घोषति ॥११७॥
(३०) आकारयत्याह्वयति हूतौ निह्वयते त्रयम् ।
(३१) स्यात्संहूतौ संह्वयते(३२)स्पर्धया ह्वयते ह्वे ॥११८॥
(३३) अनुयुङ्क्ते प्रश्नयति प्रश्ने ज्ञीप्सति पृच्छति ।
(३४) आपृच्छते तु यात्रार्थे(३५)विप्रश्ने राध्यतीक्षते॥११९॥
(३६) आभिमुख्येन वचने प्रवदत्यभिवक्ति च ।
प्रतिवक्त्युत्तरयति प्रत्याहेत्यादयो ऽपि च ॥१२०॥
(३७) अपह्नुते ऽपजानीते निह्नुते ऽपलपत्यमी ।
अपह्नवे(३८)निराचष्टे प्रत्याचष्टे निरस्यति ॥१२१॥
प्रत्यादिशत्यपनयत्यपोहति परास्यति ।
पराणुदति चापास्यत्यात्मने स्युर्व्युदस्यति ॥१२२॥
नवैते ऽपाकरोतीति प्रत्याख्याति निराकृतौ ।
पराकरोत्योणति च दूषयत्यपि लुञ्चति ॥१२३॥
(३९) उपमन्त्रयते चोपवदते सांत्वयत्यपि ।
चपत्युपच्छन्दयति सामयत्यपि सांत्वने ॥१२४॥
सप्तानुनयतीत्येवमात्मने (४०) ऽप्यथ सूचने ।
सूचयत्यप्युत्कुरुते त्रयः पिशुनयत्यमी ॥१२५॥

इति वाक्क्रियावर्गः ।

अथ ध्वनिक्रियावर्गः ॥

(१) ह्लादते नर्दति नदत्यपि गर्जति गुञ्जति ।
कूजति क्ष्वीजति गुजत्यपि गजति गृञ्जति ॥१२६॥
रेभते शिञ्जति रणत्येवं व्रणति मुञ्जति ।
अम्बते लम्बते वेटसणति कणतीति च ॥१२७॥
शब्दायते कणति च रौति भ्रणति रासते ।
वणति ध्रणति ह्रादते च ध्वनति नासते ॥१२८॥
कल्लते कौति वनति ध्वनयत्यपि मोजति ।
कवते तोसति रसत्यपि ह्रसति रायति ॥१२९॥
गवते घोषति रवीत्यपि स्यमति कायति ।
ङवते घवते क्नूयते ऽवते स्वनतीतिच ॥१३०॥
रम्भते खवते गर्जयत्येते शब्दवाचिनः ।
(२) भषते बुक्कयति च बुक्कतीति शुनां ध्वनौ ॥१३१॥
(३) रिणाति रेषते वार्के (४) तिरश्चां वाश्यते ध्वनौ ।
(५) ध्रांक्षति ध्रांक्षति ध्वांक्षत्येते स्युर्घोरवाशिते ॥१३२॥
(६) घुरत्यार्ते च कुरति तारे कोचति निस्वने ।
(८) ह्रेषते ह्लेषते ऽश्वानां(९)हस्तिनां बृंहतीति च ॥१३३॥
(१०) जीमूतानां स्तनयति गदयत्यपि गर्जति ।
(११) स्फूर्जत्यशनिनिर्घोष(१२)उत्कण्ठास्वनआनुते ॥१३४॥
(१३) उच्चर्चति च संक्रीडत्येते शकटकूजने ।
(१४) हिक्कते हिक्कतीत्येतौ हिक्कायां(१५)क्षौति तु क्षुते १३५॥
(१६) कासते कफजे शब्दे (१७) सौरते मणतीत्यदः ।
(१८) कौक्षे कर्दत्य (१९) पानोत्थे पर्दते शर्धते पर्दे ॥१३६॥
(२०) चीत्करोति टङ्करोति करिकार्मुकयोः क्रमात् ।
द्वावात्मनेपि(२१)भूषादेः शिङ्क्ते(२२)गीते तु गायति॥१३७॥

(२३) उपवीणयतीत्येतदुपगाने हि वीणया ॥१३८॥

इति ध्वनिक्रियावर्गः ।

अत्र भावविकाराणां धियामिच्छादिकर्मणाम् ।
वाचां तत्संगतानां च पर्यायाः प्राय ईरिताः ॥१३९॥

इति प्रथमकाण्डः ॥

आख्यातचन्द्रिकायाम्

द्वितीयकाण्डः ॥

अथोच्यन्ते नृविप्रादिचेष्टा वर्गैः समासतः ।
प्रसङ्गसङ्गताश्चान्याः पर्यायैस्तिङ्पदात्मकैः ॥१॥

अथ मनुष्यचेष्टावर्गः ॥

(१) प्रक्रम्यते प्रारभते प्रस्तौत्युद्घातयत्यपि ।
प्रस्तुते चोपक्रमते दशोपक्रम्यते ऽप्यमी ॥२॥
अभ्यादत्ते प्रक्रमतउपजानात्युपक्रमे ।
(२) कृतौ करोत्यावहति विदधात्यादधाति च ॥३॥
वितनोत्यात्मने पञ्च (३) सृजत्युत्पादयत्यपि ।
निर्मिमीते भावयति निर्माति रचयत्यपि ॥४॥
निष्पादयति निर्वर्तयति साधयतीति च ।
(४) अनुतिष्ठत्याचरति श्रद्धायुक्ते ऽनुसृज्यते ॥५॥
(५) उत्तिष्ठते तु घटते चेष्टते त्रन्दतीहते ।
व्यायच्छते व्याभियते चेष्टने ऽष्टौ प्रवर्तते ॥६॥
(६) विड्डुत्सर्गे तु गुवति हदते (७) ऽथात्रमेहति ।
मूत्रणे मूत्रयति च प्रस्रवत्यपि च त्रयम् ॥७॥
(८) उद्वर्तयति चोत्सादयत्युत्सीदति तत्समम् ।
(९) वस्ते प्रोर्णोति संवस्त्रयति प्रोर्णोति चेलति ॥८॥
परिधत्ते परिदधात्याच्छादे प्रोर्णुते ऽष्टकम् ।

(१०) अनुलिम्पति चर्चायां दिग्धे देग्ध्यनुलिम्पते ॥९॥
चर्चत्येवं चर्चयति च (११) डयो भूषणार्थकाः ।
मण्डति मण्डयति च भूषयत्यपि भूषति ॥ १० ॥
परिष्करोत्यात्मने ऽलङ्करोति द्वे च मङ्क्ते ।
प्रसाधय (१२) त्यथोत्तंसत्यवतंसे ऽवतंसति ॥११॥
(१३) प्रतिमुञ्चत्यपिनह्यत्यामुञ्चति पिनह्यति ।
भूषाद्यामोचने चत्वार्यूहनीयानि चात्मने ॥ १२ ॥
(१४) चकास्ति भासते भाति द्योतते रोचते ऽसति ।
राजति त्वेषति घृणोत्यात्मने ऽपि चतुष्टयम् ॥ १३ ॥
भ्राजते शुम्भति शुभत्येजते शोभतीति च ।
प्रकाशते भ्राशते च भ्लाशते श्यन्यपि द्वयम् ॥१४॥
भ्रेजते दीव्यति हटत्यमी ज्वलति जोतते ।
वर्चते दीप्यते दीप्तौ कनत्युल्लसतीति च ॥ १५ ॥
केचिज्जिघर्ति दीधीते बभस्ति छान्दसान्विदुः ।
कञ्चते योतते मन्दते ऽमी द्वात्रिंशदीरिताः ॥ १६ ॥
(१५) नटत्यमी नाटयति नृत्ते नृत्य (१६) त्यथो हसे ।
जक्षिति कक्खति तकति प्रहसति कखति घघति स्मयते॥१७॥
(१७) क्रीडति दीव्यति खेलति केलति विहरति च कूर्दते लसति ।
रमते ऽमी विहरते कुमारयति खूर्दते ॥ १८ ॥
केलायति ललत्येलायति खेलायतीति च ।
आङो ऽनुसंपरिभ्यश्च क्रीडते क्रीडनार्थकाः ॥१९॥
(१८) हिलति स्याद्भावकृतौ त्रयं चुड्डति चुल्लति ।
(१९) विडम्बयत्यनुकरोत्यात्मने ऽनुहरत्यदः ॥ २० ॥
अनुकारे (२०) रिङ्गणे तु रिङ्गति स्खलति द्वयम् ।
(२१) भण्डते स्फुण्डयति च केलौ परिहसत्यपि ॥ २१ ॥

(२२) कुत्सिते स्मयने प्रोक्तं तङ् वा कुस्मयते पदम् ।
(२३) तर्षे तृष्यत्यमी धित्सत्युदन्यति पिपासति ॥ २२ ॥
(२४) पिवत्याचामति धयत्यपि चूषति पीयते ।
पाने(२५)ऽथ क्षुध्यति क्षुध्यशनायति जिघत्सति॥२३॥
(२६) जेमत्यश्नाति जमति भक्षयत्यत्ति खादति ।
चरति प्साति झमति भुंक्ते चमति चर्वति ॥ २४ ॥
वल्भते घसति क्वापि छमति प्रत्यवस्यति ।
चषत्यप्यभ्यवहरत्येते तर्णोति भक्षति ॥ २५ ॥
तृणोति चात्मने पञ्चाप्युपभुंक्ते च जक्षिति ।
वेति भुक्तौ–विष्वणति चावष्वणति सध्वनौ ॥२६॥
(२७) ग्रसते ग्लसते गीर्णौ गिरत्येते गिलत्यपि ।
(२८) गर्हितायां निजागर्ति निजेगिल्यत इत्यपि ॥ २७ ॥
(२९) दंदश्यते दन्दशीति दन्दष्ट्यपि च खर्दति ।
गर्ह्ये दंशे(३०)ऽथ दशति शुद्धे दंशयति द्वयम् ॥२८॥
(३१) वान्तौ वमत्युद्गिरति स्नुह्यत्युद्गिलतीत्यमी ।
(३२) निष्ठीव्यति ष्ठीव्यति च निष्ठीवति च थूत्कृतौ ॥२९॥
(३३) शेषे परिशिनष्टीति शेषयत्यपि शेषति ।
(३४) तृप्यत्येते मादयते तृप्तौ घ्रायति तृम्फति ॥ ३० ॥
तृप्नोत्येके छन्दसीदं तृपत्येवं चकत्यपि ।
(३५) विश्राम्यतीति विश्रान्तौ क्वचिद्विश्रमते मतम् ॥३१॥
(३६) स्युरास्ते तूपविशति निषीदत्युपवेशने ।
(३७) ऊर्ध्वीभवति तूत्तिष्ठत्यूर्ध्वत्वे तिष्ठतीत्यपि ॥ ३२ ॥
(३८) आदाने कोकते लाति गर्हते ग्लहते क्वचित् ।
वर्कते घिण्णते गृह्णात्येवं झषति चीवति ॥ ३३ ॥
स्वीकरोतीति चत्वारि चात्मने स्युः प्रतीच्छति ।

घुण्णाते ऽमी गृह्यते घृण्णाते स्युश्चतुर्दश ॥ ३४ ॥
(३९) रहति त्यजति त्यागे जहात्युज्झति बुस्यति ।
विसृजत्युत्सृजति च मुञ्चते मुञ्चतीति च ॥ ३५ ॥
विष्यत्यवस्यति रहयति मोक्षयतीत्यपि ।
मोचयत्यूनयति चोत्सृज्यते हापयत्यमी ॥ ३६ ॥
(४०) वृणक्ति वर्जयति च वृङ्क्ते युङ्क्ति जुङ्क्ति ।
वर्जने राखति प्रत्याचष्टे वर्जति वुङ्क्ति ॥ ३७ ॥
व्यासेधति निषेधत्यात्मने परिहरत्यपि ।
(४१) अथ श्रीणाति वरति वृणाति च वृणोति च ॥३८॥
श्रीणयात्मने ऽपि वरणे वारयत्यपि वृक्षते ।
वावृत्यते कीटयति श्रीयते चापि वृश्यति ॥ ३९ ॥
(४२) करोति हस्तेपाणिभ्यां कुरुते चोपयच्छते ।
विवहत्युद्वहति चोद्वाहे परिणयत्यपि ॥ ४० ॥
चत्वारि चात्मने(४३)ज्येष्ठे ऽनूढे ऽत्र परिविन्दति ।
(४४) परिष्वजतआश्लिष्यत्यालिङ्गत्युपगूहति ॥ ४१ ॥
क्रोडीकरोत्वात्मने द्वावङ्कपालयतीति च ।
आलिङ्गने सप्त परिरभते(४५)ऽप्यथ कामने ॥ ४२ ॥
रिंसते कामयते यियप्सति(४६)वृषस्यति ।
अन्यस्त्री चे(४७)दथाश्वा चेदश्वस्यत्यथ(४८)चुम्बने ॥४३॥
निक्षति चुम्बति निंस्ते(४९)व्यवैति मिथुनीभवत्यपि च ।
यभति च भजतीत्येते निधुवति संविशति मैथुने ऽमी स्युः॥४४॥
(५०) उपभुङ्क्ते तूपभोगे सम्भुङ्क्ते निर्विशत्यपि ।
(५१) शूलत्यामयतीत्येते रुजत्यपि रुजि त्रयम् ॥ ४५ ॥
(५२) प्रसूयते प्रसूते च गर्भमोक्षे विजायते ।
प्रजायते जनयति जजन्ति छान्दसं विदुः ॥ ४६ ॥

(५३) उल्लाघयति भैषज्ये भिषज्यति चिकित्सति ।
उपक्रमतइत्येतच्छाम्यत्युपरमत्यमी ॥ ४७ ॥
इति मनुष्यचेष्टावर्गः ।

अथ ब्रह्मचेष्टावर्गः ॥

(१) प्रक्षालयति पल्यूलयतिं शोधयतीत्यमी ।
निर्णेनेक्ति पुनातीति धावत्यप्यात्मने त्रयम् ॥४८॥
निङ्क्ते मार्ष्टि च शौचे स्युर्मार्जयत्यपि मार्जीत ।
(२) मज्जत्याप्लवते स्नाति स्नायसेते ऽवगाहते ॥४९॥
स्युर्मज्जने क्रुडसेते(३)शुन्धयत्यपि शुन्धति ।
शुन्धते शुध्यति शुचीभावे स्युरवदायति ॥५०॥
(४) उपस्पृशति चाचामत्यमू आचमनार्थके ।
(५) अभिवादयते नमति प्रणतावभिवन्दते नमस्यति च॥५१॥
उपसंगृह्णात्युपसंगृह्णीते प्रणिपतति नमस्कुरुते ।
(६) अथार्चत्यञ्चति भजत्यपचायति चात्मने ॥५२॥
चत्वारि वल्गूयति च सभाजयति मानति ।
सपर्यत्यर्चयति चाराध्नोति महयत्यपि ॥५३॥
पूजयत्यर्हयति च महत्याराधयत्यपि ।
मानयत्यञ्चयति चार्हति यक्षयते ऽर्चने ॥५४॥
(७) संमन्यते त्वाद्रियते संभावयति सूर्क्षति ।
सत्करोत्यादरे ऽपि स्यु(८)रुपास्तौ वरिवस्यति ॥५५॥
शुश्रूषते परिचरत्युपास्ते च द्रवस्यति ।
(९) यजति त्रिदशार्चायां यजते चोपतिष्ठते ॥५६॥
(१०) भिष्णज्यत्युपसेवायां लाडयत्युपसेवते ।
वासयत्यपि संवाहयति विश्रमयत्यपि ॥५७॥

(११) ददाति निर्वपति च दधात्यपि च दाशति ।
सनोति दासति दिशत्यात्मने सप्त यच्छति ॥५८॥
अपवर्जयति स्पर्शयति विश्राणयत्यपि ।
वितरत्यर्पयति च चणत्यतिसृजत्यपि ॥५९॥
ददते राति शणाति प्रतिपादयतीति च ।
दाने विलभते भ्राजयति श्रणाति लाति च ॥६०॥
(१२) स्वधाकरोत्यात्मने द्वौ पितृभ्यो निर्वपत्यपि ।
(१३) विक्षिपत्यात्मने ऽपि स्याद्विक्षेपे विकिरत्यपि ॥६१॥
(१४) प्रक्षिप्यति प्रक्षिपति मिनोत्यप्यात्मने द्वयम् ।
प्रक्षेपे पर्थयति च(१५)हविर्दाने जुहोत्यदः ॥६२॥
स्वाहावौषड्वषड्भ्यश्च करोति कुरुते पदे ।
(१६) प्रीणाति प्रयति द्वावप्यात्मने ऽत्रति तर्पति ॥६३॥
पृणाति प्रीणयति च जिन्वत्यपि च हिन्वति ।
धिनोति धिन्वति भ्रायतीत्यादीनि च तर्पणे ॥६४॥
(१७) केतयत्यामन्त्रयते निमन्त्रयतइत्यपि ।
आमन्त्रणे ग्रामयति कुणयत्यपि पञ्चकम् ॥६५॥
(१८) धापयत्यात्मने ऽपि द्वौ धापने पाययत्यमू ।
चूपयत्यादयो ऽप्यत्र स्यु(१९)रथो परिवेषणे ॥६६॥
परिवेवेष्टि परिवेविष्टे यामयति त्रयम् ।
(२०) भ्रादयत्यात्मने ऽप्येतद्भोजयत्यादि भोजने ॥६७॥
(२१) पृणाति पूरयति च पिपर्ति प्राति पूर्वति ।
पारयत्युम्भति तथा पर्वत्युभति मर्वति ॥६८॥
तूणयत्याप्याययति पूरणे स्युर्भृणाति च ।
(२२) आह्लादते मृडति च मृणाति सुखयत्यपि ॥६९॥
पृडत्येवं मदयति मृडयत्यावि तोषणे ।

(२३) इज्यारम्भे दीक्षते च(२४)जपतीसि जपे तथा ॥७०॥
(२५) जंजप्यते तु जंजप्ति कुत्सिते जंजपीति च ।
(२६) अभुक्तौ तूपवसति लङ्घते व्रतयत्यपि ॥ ७१ ॥
(२७) तपस्यति श्राम्यति च तप्यते च तपःक्रुतौ ।
(२८) मुण्डति मुण्डयति च मौण्ड्ये वापयतीति च ॥ ७२ ॥
भद्राकरोत्यात्मने ऽपि द्वयं भद्राकरोति च ।
(२९) उपेक्षतउदास्ते च पदे माध्यस्थ्यवाचिनी ॥ ७३ ॥
(३०) स्युर्विरज्यत्युपरमत्यात्मने विरमत्यमी ।
उपशाम्यति वैराग्ये मोक्षते च मुमुक्षते ॥ ७४ ॥
(३१) परिव्रजति संन्यासे संन्यस्यत्यात्मने ऽप्यदः ।
(३२) ब्रह्मीभवति कैवल्ये मुच्यते चापवृज्यते ॥ ७५ ॥

इति ब्रह्मचेष्टावर्गः ।

अथ क्षत्रियचेष्टावर्गः ॥

(१) ऐश्वर्यइन्दति नाथति सुरत्यपि नाधते ।
तप्यते तपतीत्येके सुवतीष्टे च सौति च ॥ ७६ ॥
(२) भुनक्ति पाति दयते गोपायति पिपर्ति च ।
रक्षति त्रायते त्राणे पालयत्यपि तेजति ॥ ७७ ॥
स्पृणोति कुण्डयति च गुण्डत्यवति जंसति ।
(३) शास्ति शिष्टौ दण्डयति शिक्षयत्यपि दाम्यति ॥७८॥
(४) आवर्जयति वशयत्यपि राधयतीति च ।
वशीकरोति संगृह्णात्यात्मने द्वौ वशीकृतौ ॥ ७९ ॥
(५) परिक्रीसीतइत्येतदुक्तोचादिवशीकृतौ ।
(६) आयत्तौ स्यादायतते वशीभवति राध्यति ॥ ८० ॥
(७) स्थिरीकृतौ स्थापयति द्रढयत्यपि बृंहति ।

(८) दधाति धत्ते बिभृते बिभर्ति भरतीति च ॥ ८१ ॥
धरतीत्यात्मने ऽपि द्वौ भुरण्यति धियत्यपि ।
मलते धारयति च मल्लते पोषयत्यपि ॥ ८२ ॥
दधते वासयति च स्कुन्दते धारणार्थकाः ।
(९) नियुङ्क्त्याज्ञापयति निर्दिशत्यादिशत्यपि ॥ ८३ ॥
द्वावात्मने ऽपि चाज्ञाया(१०)मथ प्रस्थापयत्यमी ।
स्युः प्रेषणे प्रेपयति प्रेष्यति प्रहिणोति च ॥ ८४ ॥
(११) संदेशे वादयति च संदिशत्यात्मने ऽप्यदः ।
(१२) सुवति क्षिप्यति प्रेरयतीरति कुक्षुभ्यति ॥ ८५ ॥
नुदति क्षिपतीत्येतावात्मने कालयत्यपि ।
डिपत्येवं डेपयति लाभयत्यपि डिप्यति ॥ ८६ ॥
प्रेरयत्येलयति च प्रेरणे ऽस्यति विस्यति ।
(१३) सेवते जुषते चापि शेवते क्लेवते ऽपि च ॥८७॥
खेवते गेवते चापि ग्लेवते पेवते तथा ।
मेवते चापि सेवायां भजति श्रयतीति च ॥८८॥
आत्मने ऽनुरुणद्ध्येते ऽनुसरत्यनुवर्तते ।
(१४) सम्भक्तौ तु वृणीते स्युर्वनत्येवं सनत्यमी ॥८९॥
(१५) सजूःकरोत्यात्मने ऽपि साह्ये सत्राकरोति च ।
(१६) नृणाति लम्भयति च वहत्यपि नयत्यमू ॥९०॥
आत्मने ऽपि प्रापणे स्युः प्रापयत्यापयत्यपि ।
गत्यर्था ये णिजन्तास्ते धातवो नीञ्समार्थकाः ॥९१॥
(१७) मन्दायते शोठति च लुण्ठत्यपि विलम्बने ।
द्वावात्मनेपि समयाकरोति व्याक्षिपत्यमू ॥ ९२ ॥
(१८) प्रतीक्षते प्रतीक्षायां स्युरागमयते तथा ।
अनुपालयतीत्येते प्रतिपालयतीति च ॥९३॥

(१९) त्वरायां संभ्रमति च संभ्राम्यति तुरण्यति ।
गुप्यति त्वरते सप्त संभ्रम्यति तुतोर्ति च ॥९४॥
(२०) वैक्लव्ये विक्लवति च टलति ट्वलतीति च ।
समति स्तमतीत्येते विह्वलत्यपि कन्दते ॥९५॥
क्रन्दते ऽपिच कैश्चित्तु क्लदते क्रदते स्मृते ।
(२१) क्लीबायते क्लीबते च क्लैब्ये स्युरवगल्भते ॥९६॥
(२२) कुटति ग्रन्थते हूर्छत्यपि क्मरति वङ्कते ।
नसते तुणति क्रुञ्चत्येवं ह्वरति कुञ्चति ॥९७॥
भुजति ध्वरतीत्येते कौटिल्ये न्युब्जतीति च ।
(२३) गुप्तोक्तौ स्यान्मन्त्रयते(२४)भेदे तूपजपत्यदः ॥९८॥
(२५) दम्भेच्छायां धीप्सतीति दिदम्भिषति धिप्सति ।
(२६) संवर्मयति सन्नह्यत्यात्मने सज्जतीत्यमी ॥९९॥
संयतते दंशयते सन्नाहे पदपञ्चकम् ।
(२७) अध्यास्ते त्वधिशेते चाधिवसत्यधितिष्ठति ॥१००॥
अधिरोहत्यधिक्रामत्यारोहत्यधिरोहणे ।
(२८) स्पन्दने स्पन्दते तद्वत्स्फुरति स्फुलति द्वयम् ॥ १ ॥
(२९) चलने चलति प्रेङ्खत्येवं झलति घट्टते ।
वलते वल्लते वेल्लत्येवं ह्वलति चेलति ॥ २ ॥
(३०) उच्छाये तटति स्तुप्यत्युच्छ्रयत्यात्मने ऽप्यदः ।
(३१) क्षोभते क्षुभ्यति क्षोभे क्षुभ्नाति च्छान्दसं क्वचित् ॥ ३ ॥
(३२) प्रतिष्ठते ऽञ्चत्ययते व्रजत्ययति गच्छति ।
ऋणोत्यटति यासीति सरतीयर्ति सर्पति ॥ ४ ॥
हम्मति द्रमति त्वङ्गतीङ्गत्यमति मीमति ।
जिहीते कङ्कते नक्षतीखत्यृच्छति वभ्रति ॥ ५ ॥
श्वङ्कते त्रौकते वस्कते ऽहते टीकते ऽभ्रति ।

मस्कते लङ्घते शोणत्यङ्घते त्रङ्कते ऽर्दति ॥ ६ ॥
पयते वयते विच्छायति पन्थयतीजते ।
चरण्यति स्रङ्कते ऽपि घटते श्वञ्चते ऽङ्गति ॥ ७ ॥
रङ्गति श्वचते लङ्गतीर्ते ध्वजति ध्वञ्जति ।
चरति ध्रञ्जति शवत्यण्ठते ग्लुञ्चतीष्यति ॥८॥
वञ्चति म्रोचति म्लोचत्यजति त्वञ्चतीजते ।
फणति द्रवते गाते पद्यते विच्छति क्वचित् ॥९॥
पथति क्रामति पतयते रिण्वति रण्वति ।
स्रवति श्यायते धन्वत्यञ्चते सलतीत्यपि ॥१०॥
शुनति छङ्गयति च श्वर्तयत्यपि रेवते ।
ससर्ति च्छान्दसं केचिद्देपते नेपते गतौ ॥११॥
सप्ताशीतिरितो ऽप्यन्ये नोक्ता विस्तरतो भयात् ।
(३३) वेगितायां गतौ सप्तामी स्युर्धावति तूर्यते ॥१२॥
जवति श्वल्लति श्वलत्यपि द्रवति रंहति ।
(३४) डयते डीयते व्योमगते (३५) ऽथाकति चागति॥१३॥
चञ्चूर्यते ऽटाट्यते जङ्गम्यते चाप्यरार्यते ।
गत्यर्था यङ्लुगन्ता ये कुटिलायां गतौ हि ते ॥१४॥
(३६) वल्गतीति प्लुतगतौ प्लवते शशति त्रयम् ।
(३७) मन्दायां चोपतिं गतौ(३८)चतुरायां तु धोरति॥१५॥
(३९) सन्ततायामतति च(४०)त्सरतिच्छद्मना गतौ ।
(४१) मन्दते विकलायां तु द्वयं खञ्जति खोरति ॥१६॥
(४२) नीचैः फक्कति(४३)कुत्सायां द्रा(४४)सथाग्रे पुरसदः ।
(४५) पवते वाति वातस्य(४६)वहति प्रवहत्यपाम् ॥१७॥
(४७) भ्रमति भ्राम्यति भ्रम्यत्यपि पर्यटति भ्रमे ।
घोणते घूर्णते पर्येत्येते घुणति घूर्णति ॥१८॥

(४८) उद्गच्छत्युन्नमति चाप्युज्जिहीतउदीयते ।
उदञ्चत्युदयत्येतावात्मने द्वावुदेति च ॥१९॥
गत्यर्थाः प्राय उत्पूर्वा उदयस्याभिधायकाः ।
(४९) आक्रम्यते चाक्रमते ज्योतिष्कर्तृकउद्गमे ॥ २० ॥
(५०) संचारे चरतीत्येष तृतीयायुक्त आत्मने ।
(५१) पतत्यधोगतौ भ्रंसते ऽपि भ्रश्यति भृश्यति ॥ २१ ॥
गलति स्रंसते ऽष्टामी च्यवते स्कन्दतीति च ।
(५२) अस्तंगमे ऽस्तमयते निम्लोचत्यस्तमेति च ॥ २२ ॥
(५३) इष्यति नश्यति पलायते ऽन्तर्धत्तइत्यपि ।
मुण्ठते ऽपैत्यपक्रामत्येवमाद्याः पलायने ॥ २३ ॥
(५४) स्कुनाति च स्कुनीते च स्कुनोत्याप्रवते ऽपि च ।
स्कुनुते स्कुन्दते चापि पडाप्रवणवाचिनः ॥ २४ ॥
(५५) अतिक्रामत्युच्चरते चाट्टत्यतिचरत्यपि ।
उल्लङ्घयत्यतिक्राम्यत्येवमाद्या अतिक्रमे ॥ २५ ॥
(५६) धौत्यभिगच्छत्यभियात्यभ्येत्याद्या अभिक्रमे ।
(५७) अभियोगे ऽभ्यवस्कन्दत्यङ्घुत्यास्तिघ्नुते ऽपि च ॥२६॥
सप्ताभियुङ्क्ते तिक्नोति तिघ्नोत्यासेधतीति च ।
(५८) सेनया त्वभियाने स्यादभिषेणयतीति च ॥ २७ ॥
(५९) सन्निकर्षत्यवष्टभ्नात्यासीदत्यपि नेदते ।
परस्मै द्वौ संनिकृषते ऽवष्टभ्नोति चान्तिके ॥२८॥
(६०) प्राप्तौ प्राप्नोति भवते विन्दत्यवरुणद्धि च ।
आत्मने ऽपि द्वयं भावयते लभतऋच्छति ॥२९॥
(६१) व्याप्नोति चाश्नुते ऽक्ष्णोति व्याप्तौ श्लाखति शाखति ।
द्वावाचिनोति वेवेष्ट्यात्मने ऽप्यक्षति चेन्वति ॥ ३० ॥
(६२) पर्याप्नोति तु शक्नोति क्षमते प्रभवत्यपि ।

प्रोथत्यलत्यात्मने ऽपि द्वौ पारयति कल्पते ॥ ३१ ॥
राघते लाघते शक्तौ स्फुरते विभवत्यपि ।
(६२) स्युरुद्यमे ऽवगुरते वृहत्यडति गूर्यते ॥ ३२ ॥
उद्गारयतउद्युङ्क्तउद्यच्छत्यात्मने ऽप्यदः ।
(६३) हेडति स्नायति वटत्यपि गुध्यति वण्डते ॥ ३३ ॥
मण्डते वेष्टते वेष्टे मगध्यति मुरत्यपि ।
कृणत्ति गुण्डयति च परिक्षिपति चात्मने ॥३४॥
(६४) वेष्टनायां वटयति वेष्टयत्यादयो ऽपि च ।
(६५) निरुणद्धि निगृह्णाति चात्मने द्वौ निरोधने ॥३५॥
(६६) आञ्छत्याकर्षआकर्षत्यायच्छत्यात्मने ऽप्यदः ।
(६७) धृष्णोति चाधिकुरुते धर्षयत्यपि धर्षति ॥३६॥
जयत्येवं विजयते जयत्यभिभवत्यपि ।
अभ्यस्ति च प्रसहते पराभावयतीति च ॥३७॥
विमानयत्यभिभवे व्लीनाति न्यक्करोति च ।
लङ्घयत्याक्रमति च तरत्याक्रम्यतीति च ॥३८॥
(६८) विशेषयत्यतिशये ह्यतिशेते विशेषति ।
उत्कर्षयत्यञ्चयतिं विशिनष्टि प्रकर्षति ॥३९॥
(६९) चित्रीयते लिङ्गयति विस्माययति चाद्भुते ।
(७०) स्यातां कुहयते विस्मापयते हेतुतो ऽद्भुते ॥४०॥
(७१) धूनयति धुवति चलयति धूनोति धवति धुनाति च धुनोति ।
चत्वारि चात्मने कम्पयति क्ष्मापयति वाजयति ॥४१॥
द्रालयति ह्मालयति द्रलयति ह्मलयतीति स्युः ।
तद्वत्प्रेङ्खोलयति प्रकम्पने डोलयत्यपि च ॥४२॥
(७२) विलोडयति मथ्नाति मथत्येवं खजत्यपि ।
गाहते मन्थने लुथ्यत्यपि लोटति मन्थति ॥४३॥

(७३) खेटत्युत्त्रासने भाययत्येवं दरयत्यपि ।
(७४) प्रयोजकाद्भये भीषयते भापयतेऽपि च ॥ ४४ ॥
(७५) क्ष्मायते कम्पते त्वङ्गत्येजतीर्ते च वेपते ।
केपते ग्लेपते कम्पे गेपते विजते दश ॥४५॥
(७६) ताडने ताडयति च हन्ति विध्यति तण्डते ।
प्रहरत्यात्मने सट्टयति स्फिट्टयतीति च ॥४६॥
आघट्टयति चास्फालयति जासयतीत्यमी ।
आहतेऽकर्मकत्वे स्यात् स्वकीयेऽङ्गे च कर्मणि ॥४७॥
(७७) युध्यते संप्रहरते युद्धे जजति जञ्जति ।
संमर्दयति संग्रामयतीमे कलहायते ॥४८॥
(७८) करोत्युपाजेऽन्वाजेभ्यामात्मने ऽपि बलार्पणे ।
(७९) विक्रम्यते वीरयते पराक्रमतइत्यपि ॥४९॥
प्रगल्भते शूरयते पराक्रम्यतइत्यसौ ।
ओजायते विक्रमते विक्रमेऽष्टपदी भवेत् ॥५०॥
(८०) अरुष्करोत्यात्मनेऽपि व्रणयत्यङ्गचूर्णने ।
(८१) गोकर्तृकायां हिंसायां प्रस्तुम्पति सुटा भवेत् ॥५१॥
(८२) हिनस्ति संज्ञपयति सूदते हन्ति तर्दति ।
तोपति च त्रोपतीपत्यपि तूर्वति धूर्वति ॥५२॥
तोफति त्रोफति रुशत्यपि तुम्पति त्रुम्पति ।
तुम्फति त्रुम्फति शसत्यूर्वत्यर्वति तोजति ॥५३॥
नभते भर्वति मपत्येवं नभ्नाति नभ्यति ।
तोभते शर्वति वपत्यपि तुभ्नाति तुभ्यति ॥५४॥
शूर्यते शेपति तुपत्यपि रोपति रेपति ।
धूर्यते यूपति तुफत्यपि दूर्वति धूर्वति ॥५५॥
प्रमापयत्यर्दयति निर्वापयति रिष्यति ।

तृणेढि मारयति च श्लथत्यर्दति गूर्यते ॥५६॥
क्रथत्युज्जासयति च श्राथयत्यपि युध्यति।
तृहत्युध्नुटयति च क्षिणाति च कृणाति च ॥५७॥
प्रतिष्किरत्यालभते तृणात्युन्मथतीति च।
क्षिणोति छ्रषति दूणाति कृणोति क्षिणोति च ॥५८॥
अष्टौ क्षणोति मीनाति कृणातीत्यात्मने ऽप्यमी।
कुन्थति पुन्थति लुन्थति रिशति रुशति हिंसति स्तृहति॥५९॥
तृंहति स्तम्भति मृणाति च चुम्बयति श्रथति च क्लथति।
सर्भति मेदति दृणाति स्फिट्टयति च हिंसयत्यमी चृतति॥६०॥
षण्णवतिर्हिंसायामुक्ताः शिष्टाश्च ये गणे दृश्याः।
केवालीखेवालीगेवालीमसमसाशब्दाः ॥६१॥
अर्धालीवर्षालीपर्वालीमसमसाश्च तथा।
गतिसंज्ञा हिंसायामष्टोद्दिष्टाः करोतेः प्राक् ॥६२॥
(८३) वस्तयते गन्धयते लुम्बति लुम्बयति चार्दनार्थाः स्युः।
ओहति तोहति दोहति तद्वत्तुम्बति च तुम्बयसेते॥६३॥
(८४) दम्फति दफति दुनोति व्यथयति दुःखयति तपति पीडयति।
क्लिश्नाति दूनयत्यपि धूपायति खेदयत्याद्याः ॥६४॥
दुःखाकरोति तुदति च करोति वैकल्यमुदाद्रिभ्यो ऽमी।
आत्मने ऽपि ग्लपयति ग्लापयत्यपि पीडने ॥६५॥
रोठते लोठते कुथ्नात्यपि मन्थति बाधते।
एठते हेठते तत्र लोटते क्लेशयत्यपि ॥६६॥
शण्डते शूलति रुजत्यूपत्यामयतीति च।
(८५)*उनक्ति मोटयति च भञ्जयत्यपि मोटति ॥६७॥
मुटति म्रदते मर्दे मृद्नाति च पिनष्टि च।

---

* अनक्ति नि०।

क्षुन्ते क्षुणत्ति संचूर्णयति पाशयतीति च ॥६८॥
(८६) पंसयति ध्वंसयति च नक्कयति च धक्कयत्येते ।
जम्भयति क्षपयति च नाशयति च नाशनार्थाः स्युः॥६६॥
(८७) उन्मूलयत्युज्जहाति चोत्पाटयति वै समाः ।
उत्खनत्यात्मनेऽप्येते पञ्चोज्जटयतीति च ॥७०॥
(८८) भङ्गे पराभवत्युक्ते पराभवतइत्यमू ।
(८९) जयत्युत्कर्षसंप्राप्तौ तथा विजयते पदम् ॥७१॥
इति क्षत्रियचेष्टावर्गः ।

अथ वैश्यचेष्टावर्गः ॥

(१) कृषते कृषतीत्येते कृषौ क्षुरति कर्षति ।
रदत्येवं विलिखति हलति स्युः खनत्यपि ॥७२॥
(२) वीजाकरोत्युप्तकृष्टौ(३)स्याद्द्वितीयाकरोति च ।
शम्वाकरोति द्विगुणाकरोति द्विः कृषौ त्रयम् ॥७३॥
(४) तृतीयात्रिगुणाभ्यां च करोति त्रिः कृषौ मतम् ।
आख्यातानि खनत्यादीन्यूहनीयानि चात्मने ॥७४॥
(५) हलिग्रहे हलयति हलिरुक्तो महद्धलम् ।
(६) वपत्युप्तौ प्रकिरति वपते (७) ऽप्यथ रोपणे ॥७५॥
शूलयत्यपि संरोहयति संरोपयत्यपि ।
(८) ध्रुवति ध्रवति स्थैर्ये स्थिरीभवति खायति ॥७६॥
वदत्येते च खदति मूलति प्रतितिष्ठति ।
(९) पायत्येते वायति च शोषे शुष्यति शुण्ठति ॥७७॥
आश्यायते शुण्ठयति लङ्घते(१०)ऽप्यथ वर्षति ।
उनत्ति शीकते शर्धत्यपि मर्धति सिञ्चति ॥७८॥
आर्द्रीकरोति च ज्ञेयमात्मनेऽपि चतुष्टयम् ।

सीकयति तेमयतीत्यादि जेषति मूदति ॥७९॥
सचते पर्षति गरत्यपि मेषति मर्षति ।
घरत्युक्षति सेके स्युर्नेषत्यपि च शिप्यति ॥ ८० ॥
गडत्येवं मेहति च तथा मिन्वति निन्वति ।
क्लिद्यति स्तिम्यति स्तीम्यत्यार्द्रीभावे च तिम्यति ॥८१॥
(११) स्युः पुंसयति पुष्णाति दृहत्यादि च वर्धने ।
(१२) संचये संविभर्तीति संभरत्यात्मने त्रयम् ॥ ८२ ॥
संचिनोति खलत्येवं संभाण्डयतइत्यपि ।
राशीकरोत्यात्मने द्वौ संवहति समूहते ॥ ८३ ॥
(१३) उच्चिनोति शिलत्युञ्छे सिलत्युच्चिनुते तथा ।
उञ्छति ध्रासयति च ध्रस्नात्यपि तथेषति ॥ ८४ ॥
(१४) अवहन्तीति वैतुष्यकरणे कण्डयत्यपि ।
फलीकरोति वितुषीकरोतीत्यात्मने द्वयम् ॥ ८५ ॥
परापुनात्यात्मने ऽपि प्रस्फोटयति तत्समम् ।
(१५) मिमीते मायते माने माहते मस्यतीति च ॥ ८६ ॥
शुल्वयत्यपि संमाति(१६)संभवे संभवत्यपि ।
पणते दीव्यति तथा ऽऽत्मने व्यवहरत्यदः ॥८७॥
व्यवहारे च पनते (१७) परिवर्तयतीत्यपि ।
विक्रीणीते निमयते ऽवक्रीणीते विक्रीयते ॥ ८८ ॥
सत्याकरोत्यात्मने ऽपि तुल्यौ सत्यापयत्यपि ।
क्रीणाति चैवं क्रीणीते विसारयति च क्रये ॥८९॥
(१८) निष्णाति दक्षते चापि नैपुण्ये निपुणत्यपि ।
(१९) अर्जने त्वर्जयति च तथैवार्जति सर्जति ॥ ९० ॥
(२०) कलयत्यपि संख्याति संख्याने गणयत्यपि ।
सङ्ख्ये कलते(२१)तुल्यौ त्वाहन्ति गुणयत्यम् ॥ ९१ ॥

(२२) उत्पुंसयति तु प्रोञ्छे प्रोञ्छत्युत्सारयत्यपि ।
(२३) वण्डति व्युष्यति तथा विभजत्यात्मने ऽप्ययम् ॥ ९२ ॥
विभागे वण्टयति च विभाजयत्यवमाति च ।
(२४) न्यासे निक्षिप्यति न्यस्यत्येवं परिदधाति च ॥ ९३ ॥
निक्षिपत्यात्मने चोपनिदधाति चतुष्टयम् ।
(२५) तिरोदधात्यपिदधात्यन्तर्धौ पिदधाति च ॥ ९४ ॥
तिरस्करोति व्यस्यति छन्दत्यपवरत्यपि ।
आवृणोति व्यवदधात्यूर्णोत्यातिदधाति च ॥ ९५ ॥
संवृणोति स्तृणोत्येतान्यात्मने ऽपि त्रयोदश ।
अपवारयति च्छादयति स्थगयतीति च ॥ ९६ ॥
कूलति त्वचतीत्येवं कुम्बयत्यपि कुम्बति ।
ह्रगति ह्लगतीत्येते थुडति स्थुडतीति च ॥ ९७ ॥
स्तृणोति तिरयत्येवं स्तृणुते गोपयत्यपि ।
अपोर्णुते त्वपोर्णोति(२६)विवृतौ विवृणोति च ॥९८॥
तथैवापवृणोति द्वावात्मने *निरिणाति च ।
(२७) अपेक्षते ऽभ्यर्थयते भिक्षते ऽर्दति नाथति ॥९९॥
याच्ञायां वनुते मार्गत्यमी चतति याचति ।
चदतीत्यात्मने ऽपि स्यु(२८)र्वेथते मार्गयत्यपि ॥१००॥
मार्गत्यप्यञ्चति गवेषयत्यन्वीक्षते ऽपि च ।
अन्वेषते च पयति चिनोतीत्यात्मने ऽप्यदः ॥ १०१ ॥
अन्वेषणे मृगयते मृग्यतीत्यपि केचन ।
(२९) प्रतिदत्ते विनयते निर्यातयति तत्समम् ॥१०२॥
वित्तोत्सर्गे व्ययति च तथा विनयते ऽपि च ।
(३०) दोहानुकूल्ये दुग्धे(३१)गौः प्रस्नुते प्रस्नवे स्त्रयम् ॥१०३॥

---

* विवृणानि नि० ।

रिणक्ति दोग्ध्यात्मने ऽपि प्रपूरयति दोहने ।
(३२) क्षरणे स्तेपते श्चोतत्यपि क्षरति तेपते ॥१०४॥
रीयते स्यन्दते चैव (३३) स्रवति स्नौति तु स्रवे ।
(३४) विष्णाति रेचयति च विप्रयुङ्क्ते च रेचति ॥१०५॥
विश्लेषणे स्युर्विश्लेषयति यौति वियौति च ।
(३५) मिश्रयत्यपि संयौति संपृक्ते संपृणक्ति च ॥१०६॥
मिश्रणे संसृजति च श्रीणातीत्यात्मनि ऽप्यदः ।
(३६) सङ्गतौ समियर्तीति सङ्गच्छति समृच्छति ॥१०७॥
अकर्मकास्त्वात्मने ऽमी संबध्नाति मिलत्यपि ।
समवैति व्यतिसृजत्येवं सचतउच्यति ॥१०८॥
(३७) आतञ्चत्यातञ्चने च (३८) विलम्बत्यासजत्यपि ।
आलम्बने ऽथ शैथिल्ये श्रन्थते चिछ्लतीति च ॥१०९॥
(३९) ओलण्डयत्युन्नयतउत्क्षिपत्यात्मने ऽप्यदः ।
उलण्डयति चोत्तभ्नात्युत्तभ्नोत्युत्तरत्यपि ॥११०॥
उत्तम्भयति चोत्क्षिप्यत्युत्क्षेपे दोलयत्यपि ।
(४०) आनीतावानयत्येतावात्मने ऽप्याहरत्यपि ॥१११॥
(४१) संमार्जयति संमार्ष्टि तथा परिसमूहति ।
समूहते च संमार्गे (४२) उपदेग्ध्युपलिम्पति ॥११२॥
पदद्वयं चात्मने ऽपि गोमयत्युपलेपने ।
(४३) संधुक्षयति संदीपयतीन्धे ज्वालयत्यपि ॥११३॥
संधुक्षणे ज्वलयतिच्छर्दते च्छर्दयत्यपि ।
(४४) पाके श्रीणाति पचतीत्यात्मने श्रपयत्यपि॥११४॥
रन्धयत्यपि विक्लेदयति साधयतीति च ।
श्राति श्रायति विक्लिद्यत्यपि राध्यति रध्यते ॥११५॥
पच्यते क्वथ्यते चैते पाके स्युः कर्मकर्तृके ।

(४५) ऋञ्जते भर्जते भ्राष्ट्रे तूपभृज्जति भृज्जते ॥११६॥
(४६) शूलाकरोत्यात्मने ऽपि शूलपाके पदं मतम् ।
(४७) द्रवीकृतौ लीनयति लयति द्रावयत्यपि ॥११७॥
लालयत्यपि लाययत्यपि लापयतीत्यमी ।
(४८) द्वौ संदधात्यभिषुणोत्यात्मने द्वौ च शुच्यति ॥११८॥
तथा चुच्यत्यभिषवे (४९) संस्कृतौ संस्करोत्यदः ।
आत्मने(५०)प्रतियन्ते तु स्यादुपस्कुरुते पदम् ॥११९॥
(५१) स्वादते स्वर्दते रुच्यां स्वदते रोचते ऽपि च ।
इति वैश्यचेष्टावर्गः ।

अथ शूद्रचेष्टावर्गः ॥

(१) वयते वयति व्यूतावूयते(२)ऽथ विषीव्यति ॥१२०॥
स्यूतौ निषीव्यति तथा परिषीव्यति सीव्यति ।
(३) तक्ष्णोति तक्षति तनयति त्वक्षति तक्षणे ॥१२१॥
तनूकरोत्यात्मने ऽपि परिवासयतीति षट् ।
(४) उत्तेजयति तीक्ष्णत्वे संक्ष्णुते क्ष्णौति निश्यति ॥१२२॥
निशिनोति निशीशांसत्यात्मने ऽपि मतं द्वयम् ।
(५) लुनाति लुम्पति तथा छिनत्तीत्यात्मने त्रयम् ॥१२३॥
त्रुटति छोटयति च चुटति छुटतीति च ।
छेदने वर्धयति च छयति वृश्चति कृन्तति ॥१२४॥
चतुर्दश त्रोटयति द्यति छेदयतीत्यमी ।
(६) त्रोटति त्रुट्यति च्छेदे च्छिद्यते कर्मकर्तृके ॥१२५॥
(७) भिन्ते विदारयति च भिनन्ति द्यति मुण्डति ।
विलति स्फोटयति च दृणात्याखण्डयत्यपि ॥१२६॥
मुस्यति च्छिद्रयति च दारयत्यपि भेदने ।

(८) दहति श्रेषति श्लेषत्यपि मोषति चुर्यते ॥२२७॥
तापयत्योषति तपत्यापि प्लुष्यति कुण्डते।
दाहे कूटयति प्रोषत्यमी(९)तत्र तु गर्हिते ॥ २२८ ॥
दन्दह्यते दन्दहीति दन्दग्धीति पदत्रयम्।
(१०) ग्रोचति स्तेनयति च चुरण्यति च रुण्टति ॥२२९॥
स्तेये चोरयति ग्लोचयति कोजति खोजति।
मुष्णाति लुण्टयति च मूषत्यपहरत्यदः ॥२३०॥
आत्मने(११)ऽप्यास्कन्दतीति जर्हर्तीति बलाद्धृतौ।
(१२) प्रसह्यात्मने ऽप्येष हठतीति बलात्कृतौ ॥२३१॥
(१३) धूर्तक्रियायां शठति द्राघते मङ्क्ते त्रयम्।
(१४) निष्कुष्णाति च निष्कर्षे निष्कर्षति च तूलति॥२३२॥
स्यान्निष्कुलाकरोत्येतदात्मने (१५) चात्र सव्यथे।
डाज्निष्पत्रासपत्राभ्यां करोति कुरुते परे ॥२३३॥
(१६) संदानयति बध्नाति मूर्वत्यन्वति कीलति।
पाशयत्यन्तति जुटति सिनुते च कञ्चते ॥२३४॥
कचते टङ्कयति च योजयत्यपि मव्यति।
काञ्चते ग्रन्थयति च सिनाति च सिनोति च॥२३५॥
संयच्छत्यात्मने पद स्यु र्नह्यत्यपि दधाति च।
युनातीति मवते च बन्धे मवति योजति ॥२३६॥
(१७) स्तम्भते स्कम्भते स्तम्भे वस्यत्यपि च पीलति।
स्तभ्नोति प्रतिबध्नाति स्तभ्नाति स्तम्भयत्यपि॥२३७॥
स्कभ्नोति चैव स्कभ्नाति स्तुभ्नोति स्कम्भयत्यपि।
स्तुभ्नाति चैव स्कुभ्नाति स्कुभ्नोत्येतानि षोडश॥२३८॥
(१८) साहसिक्ये प्रकुरुते(१९)दुःखयत्यघयत्यपि।
कष्टायते दुष्कृते ऽमी(२०)प्रत्यवैति तु दुष्यति॥२३९॥

विघ्ने विहन्त्यन्तरेति प्रत्यूहत्यात्मने ऽप्ययं दः ।
विघ्नयत्यन्तरयति विच्छिन्ते विच्छिनत्ति च ॥२४०॥
(२१) सन्ताने सन्तनोतीति निर्वहत्यात्मने द्वयम् ।
तथा सत्रयते सन्तानयतीति चतुष्टयम् ॥२४१॥

इति शूद्रचेष्टावर्गः ।

इति द्वितीयकाण्डः ॥

आख्यातचन्द्रिकायाम्

तृतीयकाण्डः ॥

प्रकीर्णकसनाद्यन्तनानार्थान्यात्मनेपदे ॥ १ ॥
तदन्यस्मिन् विभागश्च संगृह्यन्ते ऽत्र वर्गशः ।

अथ प्रकीर्णकवर्गः ॥

यानि पूर्वमसंगत्या नैवाख्यातान्यचक्षत ॥ २ ॥
वक्ष्यन्ते तानि वर्गे ऽस्मिन् प्रकीर्णाख्ये यथास्मृति ।
(१) विभाति व्युच्छते व्युष्टे प्रभाति विविशत्यपि ।
(२) श्विन्दते श्वेतते त्रीणि स्युः शुक्लत्वे ऽवदायति ॥ ३ ॥
(३) रज्यति त्रीणि रजति लोहितायति चात्मने ।
शोणतीति च रञ्जिभिः(४)श्यामत्वे श्यामलायते ॥ ४ ॥
नीलायते नीलति च तथा श्यामायते पदम् ।
(५) विन्दत्यवयवे भिन्दत्यवयौति सटत्यपि ॥ ५ ॥
(६) संघाते झटति श्रोणत्येवं जटति पूलति ।
गोष्टते लोष्टते श्लोणत्यपि म्रक्षति पिण्डते ॥ ६ ॥
श्लोकते हुण्डते पिण्डयति पूलयतीत्यपि ।
शण्डते ऽथो मुस्तयति स्त्यायत्यश्नोति चाक्षति ॥ ७ ॥

इति प्रकीर्णकवर्गः ।

अथ सनाद्यन्तवर्गः ॥

(१) धातोस्तुमर्थादिच्छायां सनि रूपं बुभूषति ।

शिशिक्षिषतइत्यादि—पूर्ववच्चात्मनेपदम् ॥ ८ ॥

(२) सुपो मान्ताव्ययान्यस्मात्किंचित्काम्यतिकर्मणः ।
आत्मनस्तु तदिच्छायामर्थे शब्दद्वयं भवेत् ॥ ९ ॥
पुत्रकाम्यति पुत्रीयत्यृक्काम्यत्यृच्यतीति दिक् ।

(३) एवं कर्मण आधारादाचारादुपमार्थकात् ॥ १० ॥
क्वचित्पुत्रीयति च्छात्रं मञ्चे सौधीयतीति दिक् ।

(४) उपमानात्तथा कर्तुराचारार्थे क्यङि क्विपि ॥ ११ ॥
द्वे रूपे भवतो यद्वद् गर्दभो ऽश्वायते ऽश्वति ।

(५) क्यङ्ग्योजोऽप्सरसोर्नित्यं पयआदेस्तु वा सलुक् ॥१२॥
कन्या ऽप्सरायते त्वोजायते ऽहिः कं पयायते ।
पयस्यते तथा ऽन्यस्मात्सलोपादि समूह्यताम् ॥१३॥

(६) च्व्यर्थे भृशादेर्हल्लोपे क्यङ्यच्व्यन्ताद्भृशायते ।
सुमनायतइत्यादिरूपाण्यूह्यानि सर्वतः ॥ १४ ॥
भृशः शश्वत्तृपद्रेहद्वेहद्वर्चो ऽथ दुर्मनाः ।
सुमना उन्मना ओजो ऽभिमनाश्चपलः शुचिः ॥ १५ ॥
मन्दरेफन्मद्रभद्रपण्डिताण्डरकण्डराः ।
उत्सुको हरितो नीलः फेनः शीघ्रो भृशादयः ॥ १६ ॥

(७) तत्रैव डाज्लोहितादेः क्यषि वा चात्मनेपदम् ।
दिग्लोहितायतीत्यादि डाचः पटपटायति ॥ १७ ॥
लोहितजिह्मश्यामाः सुखदुःखे धूमचर्मगर्वाश्च ।
हर्षो मूर्छा निद्रा कृपा च करुणादयो ऽप्यन्तकरणात्॥१८॥

(८) कष्टात्सत्राच्च कक्षाच्च कृच्छ्राद्गहनतो ऽपि च ।
कष्टायतेप्रभृतयः पापार्थे क्रमणे क्यङि ॥ १९ ॥

(९) तं वर्तयति रोमन्थाद्रोमन्थायतइत्यदः ।

(१०) बाष्पोष्मफेनादुद्वान्ताविदं बाष्पायते मुखम् ॥ २० ॥

(११) सुखादेः स्यादनुभवत्यर्थे दुःखायतेमुखाः ।
सुखदुःखास्रकृपणाकरुणालीकतृप्रवत् ॥ २१ ॥
कृच्छ्रप्रतीपसोढाः स्युरमी दश सुखादयः ।
(१२) शब्दादिषु कृतौ शब्दायते वैरायतेमुखाः ॥ २२ ॥
शब्दादयस्तु सूत्रोक्ता वार्तिकोक्ता अटादयः ।
अटाट्टशीकाकोटाश्च सोटापृष्ठौ च दुर्दिनम् ॥ २३ ॥
पोटापृष्वा च सुदिनं नीहारश्चेत्यटादयः ।
(१३) तपस्यतीत्यादिकं तु प्रायः पूर्वं प्रदर्शितम् ॥ २४ ॥
(१४) कण्ड्वादेर्यकि कण्डूयत्यात्मने ऽपि हृणीयते ।
असूयतीत्यादिकं च प्रायः प्रागेव कीर्तितम् ॥२५॥
(१५) धातोर्हलादेरेकाचः पौनःपुन्ये भृशे यङि ।
चेक्रीयतेप्रभृतयो (१६) न भृशार्थे शुभे रुचः ॥ २६ ॥
(१६) बहुलं लुकि तत्रापि बोभोत्यादिकमूह्यताम् ।
(१७) सूचिसूत्र्यूर्णुमूत्र्यर्त्यर्त्यशिभ्यश्च यङिष्यते ॥ २७ ॥
सोसूच्यते ऽटाट्यते ऽरार्यतइत्यादिकं ततः ।
(१८) गत्यर्थेभ्यस्तु कौटिल्ये लुपादेर्भावगर्हणे ॥ २८ ॥
यङि जङ्गम्यते लोलुप्यतइत्यादिकं भवेत् ।
(१९) प्रयोजकस्य व्यापारे धातुमात्राकृतेर्णिचि ॥ २९ ॥
भावयत्यादि तत्रोह्यं णिचश्चेत्यात्मनेपदम् ।
(२०) सुबन्तात्णिचि धात्वर्थे बहुलं भादि चेष्टवत् ॥ ३० ॥
(२१) तत्करोतीति मुण्डादेः वटुं मुण्डयतीति दिक् ।
(२२) स्थूलादेस्तु तदाचष्टे स्थवयत्यादिकं भवेत् ॥ ३१ ॥
(२३) सत्यार्थवेदादापुक् च स्यात्सत्यापयतीति दिक् ।
(२४) श्वेताश्वादश्वतरतो लोपो ऽश्वतरयोर्णिचि ॥ ३२ ॥
गालोडिताह्वारकयोर्लुप्येते इतकौ तथा ।

श्वेतयत्यश्वयति गालोडयत्याह्वरयति ॥ ३३ ॥
(२५) णिच् कृतत्वचवर्णेभ्यस्तं गृह्णात्यर्थइष्यते ।
अतत्वं च हलिकल्योः स्या(२६)न्निध्याने रूपशब्दतः ॥३४॥
(२७) विमोके संयमे पाशा(२८)त्तूस्ताद्विहनने भवेत् ।
(२९) भोजने तन्निवृत्तौ च व्रतशब्दाण्णिचो विधिः ॥ ३५ ॥
(३०) परिधाने समाच्छादे वस्त्रा(३१)ल्लोम्नो ऽनुमार्जने ।
(३२) तेनातिक्रामत्यर्थे ऽश्वयति हस्तयतीति च ॥ ३६ ॥
(३३) सेनाशब्दात्तृतीयान्तादभियाने तु सः ष च ।
(३४) वीणाया उपगाने स्या(३५)त्सन्नाहे वर्मणो भवेत् ॥३७॥
(३६) चूर्णादवध्वंसने ऽर्थे(३७)तूलाण्णिजवकोषणे ।
(३८) श्लोकादुपस्तुतौ(३९)वास्याः परेश्छेदनइष्यते ॥ ३८॥
(४०) णिङ्ङ्गात्तन्निरसने दिग्घस्तयतआदिकम् ।
(४१) पुच्छादुदसने णिङ् स्यात्पर्यासे व्यसने ऽपिच ॥३९॥
(४२) चीवरात्संचये चार्थे परिधाने च णिङ् भवेत् ।
(४३) भाण्डात्समाचिनोत्यर्थे णिङ् संभाण्डयते हि दिक् ॥४०॥
(४४) निर्दिष्टार्थे कृतस्तस्मादुपसर्गादितो ऽपि च ।
कंसं घातयतीत्यादिसिद्धये ऽन्यो णिजुच्यते ॥ ४१ ॥
प्रत्यक्षमिव कंसादेः साधनत्वेन मन्यते ।
उक्तं हि भर्तृहरिणा महाभाष्यानुसारिणा ॥ ४२ ॥
शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान् ।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥ ४३ ॥

इति सनाद्यन्तवर्गः ।

अथ नानार्थवर्गः ॥

अथ नानार्थधातूत्थान्याख्यातानीह कानिचित् ।
यथामति प्रदर्श्यन्ते व्यक्तं भूवाद्यनुक्रमात् ॥ ४४ ॥
गणे ऽवधारणात्क्वापि सूत्रे तेन विशेषणात् ।
क्वाप्यर्थान्तरनिर्देशादनेकार्था हि धातवः ॥ ४५ ॥
(१) भवतीत्येष सत्तायां प्राप्तिसम्पत्तिजन्मसु, ।
आद्योपलम्भे पर्याप्तौ सामर्थ्ये प्रभवत्ययम्, ॥ ४६ ॥
सम्भावनायां माने च साहित्ये सम्भवत्यसौ, ।
शक्तिप्राप्त्योर्विभवति, प्राकट्ये व्युद्भवत्यपि, ॥ ४७ ॥
(२) ग्रन्थप्रतिष्ठालिप्सासु गाधते(३)नाथतीति तु ।
याच्ञोपतापैश्वर्येषु(४)तेष्वाशिषि च नाथते ॥ ४८ ॥
(५) स्तवे ऽभिवादने चापि वन्दते (६) भन्दते पुनः ।
सौख्यकल्याणयो(७)र्मोदमदस्वप्नगतिस्तुतीः ॥ ४९ ॥
आह मन्दतइत्येत (८) ददते दानधारणे ।
(९) क्रीडायामूर्दते माने(१०)ह्लादते ह्लादशब्दयोः ॥ ५० ॥
(११) कुन्थति पुन्थति लुन्थति मन्थति मान्थसमी पञ्च ।
हिंसासंक्लेशनयो(१२)श्चन्दत्याह्लाददीपनयोः ॥ ५१ ॥
(१३) गतिमाङ्गल्यशास्त्रेषु सेधति (१४) स्थैर्यहिंसयोः ।
खद(१५)स्थार्दति गतियाच्ञाहिंसासु संमतम् ॥ ५२ ॥
(१६) कन्दति क्रन्दति क्लन्दसाह्वाने रोदने त्रयम् ।
(१७) द्रेकते ध्रेकते शब्दोत्साहयो(१८ श्वकते पुनः ॥ ५३ ॥
तृप्तौ च प्रतिघाते च(१९ गत्याक्षेपे तु मङ्कते ।
कैतवे(२०)द्राघते त्वेतत्सामर्थ्यायामयोर्मतम् ॥ ५४ ॥
(२१) गतौ लङ्कतइत्येतन्निवृत्तौ भोजनस्य च ।
(२२) शोषणे चालमर्थे च राखत्योखति लाखति ॥ ५५ ॥

द्राखति ध्राखतीत्येते(२३)गतौ त्वङ्गति कम्पने ।
(२४) मञ्चते धारणोच्छ्रायपूजने(२५)ष्वथ कञ्चते ॥ ५६ ॥
दीप्तिबन्धनयो(२६)र्गत्यामीजते कुत्सनेऽपि च ।
(२७) शाठ्यमेदनदम्भेषु मुञ्चते मचते पदम् ॥ ५७ ॥
(२८) स्थानार्जनोपार्जनगतिष्वृजेः स्यादर्जते पदम् ।
(२९) स्यात्संपर्चनकौटिल्यप्रतिष्टम्भविलेखने ॥ ५८ ॥
तारे शब्दे कौचतीति(३०)याच्ञागत्योस्तथाऽञ्चते ।
(३१) तयोश्च पूजने चाञ्च(३२)त्यजति क्षेपणे गतौ ॥५९॥
(३३) कौटिल्याल्पीभवनयोः कुञ्चति क्रुञ्चतीत्युभे ।
(३४) मूर्छत्येष समुच्छ्राये मोहे स्यात्(३५)खर्जतीति तु ॥६०॥
व्यथने पूजने(३६)हिंसात्राणयोस्तुञ्जतीत्ययम् ।
(३७) शब्दे गर्जति मादे च(३८)हिण्डतेऽनादरे गतौ ॥६१॥
(३९) अतिक्रमे च हिंसायामट्टते(४०)मुण्ठते शुचौ ।
पलायने च(४१)कटति वर्षावरणयोर्गतौ ॥ ६२ ॥
(४२) शटत्ययं विशरणे गतौ रुज्यवसादने ।
(४३) बाल्ये च परिभाषायां लटती(४४)त्यथ पेटति ॥६३॥
शब्दसङ्घातयो(४५)र्मादे निवासे च मठत्यदः ।
(४६) हठतीति बलात्कारे प्लुतौ शङ्कन्दनेऽपि च ॥६४॥
(४७) हिंसासंक्लेशयोः पेठ(४८)त्यथो शठति कैतवे ।
तयो(४९)श्चाथो लुण्ठतीति गतावालस्यएव च ॥६५॥
(५०) तेपते क्षरणे कम्पे(५१)ग्लेपते दैन्यकम्पयोः ।
(५२) अवस्रंसे प्रमादे च स्रंसते(५३)लम्बते पुनः ॥६६॥
शब्दे चावस्रंसने च(५४)मानसे च जपत्ययम् ।
(५५) हिंसाभाषणयोः शोभ(५६)त्यत्र दीप्तौ च शुम्भति ॥६७॥
(५७) शब्दे रणति गत्यां तु घटादावेष पठ्यते ।

(५८) पैणति प्रेरणाश्लेषगमनेषु पदं त्रिषु ॥ ६८ ॥
(५९) लौहित्ये शोणति गतौ(६०)संभक्तौ वनति ध्वनौ ।
(६१) दीप्तिकान्तिगतिष्विष्टं त्रिष्वर्थेषु कनत्यदः ॥ ६९ ॥
(६२) गतौ च शब्दसंभक्त्योरमतीति प्रयुज्यते ।
(६३) क्रमते क्रम्यते स्यातां तायनोत्साहवृत्तिषु ॥ ७० ॥
(६४) नयते रक्षणे गत्यां (६५) दयते तु तयोरपि ।
आदानदानहिंसासु (६६) क्नूयते क्लेदशब्दयोः ॥७१॥
(६७) पूयते स्याद्विशरणे दुर्गन्धे (६८) चाथ तायते ।
पालने स्फीततायाश्च (६९) प्रेप्सागसोश्च हर्यति ॥७२॥
(७०) भ्रंशे ऽदने गलति च (७१) शब्दसंख्यानयोर्द्वयोः ।
कलते (७२) शलते त्वेष चलने संवृतावपि ॥७३॥
(७३) भलते भल्लते हिंसादानयोः परिभाषणे ।
(७४) चलने सञ्चये चोक्तः खलतीति (७५) फलत्यदः ॥७४॥
आदितश्चेद्विशरणे निष्पत्तौ स्यादनादितः ।
(७६) अलते ऽलति भूषायां पर्याप्तौ वारणे द्वयम् ॥ ७५ ॥
(७७) गतौ जग्धौ च चरति (७८) संघाते रुजि शूलति ।
(७९) हिंसाकरणयोः कृण्वेः कृणोति प्रापणे ऽपि च ॥७६॥
(८०) पराभिभूतावुत्कर्षे जयत्यन्ते त्वकर्मकः ।
(८१)स्वाम्यर्थदानावगतिप्रवेशयाच्ञागतीच्छाश्रुतितृप्त्यवाप्तीः ७७
आलिङ्गरक्षाद्युतिभागवृद्धिहिंसाक्रियाश्चावतिरेष वक्ति ।
(८२) धुक्षते धिक्षते संदीपनक्लेशनजीवने ॥ ७८ ॥
(८३) हिंसाविश्राणनगतिष्वीषते स्यात्तु (८४) दक्षते ।
शैघ्र्यवृद्ध्योर्घटादौ तु तदेव गतिहिंसयोः ॥ ७९ ॥
(८५) स्यान्मौण्ड्येज्योपनयनव्रतादेशेषु दीक्षते ।
(८६) जिज्ञासने च विद्याया ग्रहणे चापि शिक्षते ॥ ८० ॥

(८७) कासते कफजे शब्दे दीप्तौ चायं प्रयोगतः ।
(८८) द्राङ्क्षति ध्राङ्क्षति ध्वांक्षतीच्छायां घोरवाशिते ॥८१॥
(८९) अक्षत्यक्ष्णोति सङ्घाते व्याप्तावप्य(९०)थ मर्षति ।
सहने सेचने(९१)श्लेषक्रीडयोर्लसतीत्यदः ॥ ८२ ॥
(९२) जर्जति द्वे चर्चति संतर्जने परिभाषणे ।
(९३) उरसा गमने दाने वृद्धावपि च मोहते? ॥ ८३ ॥
(९४) क्ष्वेदते स्नेहने मोक्षे (९५) दीप्तौ स्वादे च रोचते ।
(९६) प्रमादे स्रंसते चावस्रंसने ध्वंसने गतौ ॥ ८४ ॥
(९७) क्षञ्जते दानगत्योः स्याद्(९८)व्यथते चलने भये ।
(९९) कम्पे विलसने चार्थे कम्पते चलतीत्ययम् ॥ ८५ ॥
(१००) ह्वलतीति पदं गत्यां तदेव चलने मितम् ।
(१०१) हर्षग्लेपनयोर्मित्त्वान्मदेर्मदयतीति णौ ॥ ८६ ॥
(१०२) वलतीत्येष धान्यस्यावरोधे प्राणने ऽपि च ।
(१०३) वन्धुक्रियायां संस्त्याने कोलती(१०४)त्यथ होलति ॥८७॥
स्याद्धिंसासंवरणयोः (१०५) क्रोशत्याह्वानरोदने ।
(१०६) सीदति स्याद्विशरणे गतावप्यवसादने ॥ ८८ ॥
(१०७) संपर्चने तु कौटिल्ये प्रतिष्टम्भे विलेखने ।
तारे शब्दे कोचतीति ज्वलादेरितरस्य च ॥ ८९ ॥
(१०८) मिथ्याज्ञाने ऽनवस्थाने भ्रमति भ्राम्यतीत्युभे ।
*स्यायतेः प्रागात्मने ऽपि(१०९)गतिशुद्ध्योस्तु धावति॥९०॥
(११०) पदं भूषणपर्याप्तिवारणेष्वलतीत्यदः ।
(१११) दीप्त्यादानगतिष्विष्टमसती (११२) त्यथ चीवति॥९१॥
स्यादादाने संवरणे (११३) ऽप्यथ हिंसनमेधयोः ।

---

* इतउत्तरं(१२६)स्यायतेः प्राग् वक्ष्यमाणा धातवः आत्मनेपदेपि भवन्तीत्यर्थः ।

मेदत्येत(११४)न्मेधति तु संगमे च तयोरपि ॥ ९२ ॥
(११५) कुत्सायां सन्निकर्षे च नेदती(११६)त्यथ वेणति ।
चिन्तानिशामनगतिवादित्रग्रहबुद्धिषु ॥ ९३ ॥
(११७) निशामने ऽर्चने चाय(११८)त्यथ स्पशति बाधने ।
स्पर्शने(११९)त्रहृतीत्येतत्स्यन्दने प्रापणे धृतौ ॥९४॥
(१२०) झषत्यादानसंवृत्योः हिंसायां चेन्न चात्मने ।
(१२१) यजतीति तु देवार्चादानसङ्गतिकर्मसु ॥ ९५ ॥
(१२२) ह्वयति स्पर्धने शब्दे(१२३)वपत्युप्तौ च मुण्डने ।
(१२४) दाने निरसने दीप्तावप्यवात्त्वेषतीत्यदः ॥ ९६ ॥
(१२५) शब्दसङ्घातयोर्धात्वोः स्त्याय(१२६)त्यथ धमत्यदः ।
कृशानुफूत्कृतौ शब्दे(१२७)ऽप्युपतापे स्वरत्यपि ॥९७॥
(१२८) ऋच्छेर्गतीन्द्रियलयमूर्तिभावेषु ऋच्छति ।
ऋच्छादेशे तदेवार्तेः शिति स्यात्प्रापणे गतौ ॥९८॥
(१२९) सवतीति पदं धात्वोः प्रसवैश्वर्ययोर्गतौ ।
(१३०) प्लवे तरत्युत्तरणे(१३१)स्कन्दतीति तु शोषणे ॥९९॥
गत्या(१३२)मथो नमत्येतन्नमस्कारे ऽपि शब्दने ।
(१३३) सेवने सचते तद्वत्समवाये सचत्यपि ॥ १०० ॥
(१३४) वदते तूक्तिविषयभासनोत्साहवृत्तिषु ।
(१३५) सहते ऽभिभवे क्षान्तौ गतिवृद्ध्योः श्वयत्ययम ॥१॥
(१३६) पवते रक्षणादौ च सोमस्य मरुतो गतौ ।
(१३७) निर्णेतृत्वेन भजने तिष्ठते स्वप्रकाशने ॥ २ ॥
(१३८) देवार्चासङ्गतिकृतिमैत्रीषु पथिकर्तृके ।
धात्वर्थे मन्त्रकरणे ऽकर्मके चोपतिष्ठते ॥ ३ ॥
परस्मैपदमन्यत्र लिप्सयोपस्थितौ न वा ।

इति भ्वादिगणः ।

(१३९) गतिगन्धनयोर्वाति (१४०) हन्तीति गतिहिंसयोः॥४॥
(१४१) ग्रहणे ऽप्युपहन्त्येतदशुचीकरणे? ऽपि च।
(१४२) वेतीति कान्तिगमनप्रजनासनखादने ॥ ५ ॥
(१४३) गतिशासनयोः कस्त (१४४) ईर्ते तु गतिकम्पयोः।
(१४५) ईट्टे स्तुतौ गतिनायां याञ्प्रेरणभोजने? ॥ ६ ॥
(१४६) व्यक्तवाचि भवेच्चष्टे दृष्टौ (१४७) यौति तु मिश्रणे।
अमिश्रणे ऽपि (१४८) सौतीति प्रसवैश्वर्ययोर्मतम्॥७॥
(१४९) ज्ञानविश्वासयोः प्रत्येत्य (१५०) ध्येत्यधिगमे स्मृतौ।
(१५१) भक्षे जक्षिति हसने (१५२) दीधीते भासि देवने ॥८॥
(१५३) वेवीते वेतितुल्यार्थ,श्छान्दसाविति भाष्यकृत्।
(१५४) तवीति तौति वृद्ध्यर्थे हिंसायां पूरणे गतौ ॥९॥
इत्यदादिगणः।
(१५५) जुहोति हविरामेके दाने ऽप्येके (१५६) पिपर्ति तु।
पालने पूरणे (१५७) दीप्तौ क्षरणार्थे जिघर्त्यदः ॥१०॥
(१५८) वभस्ति भर्त्सने दीप्तौ (१५९) मिमीते मानशब्दयोः।
(१६०) नेनेक्ति पोषणे शौचे (१६१) विभर्ति धृतिपोषयोः ॥११॥
तयोर्दधाति दाने चाभिदधात्युक्तिबन्धयोः।
श्रद्दधाति तु विस्रम्भस्पृहयोः पञ्च चात्मने ॥१२॥
इति जुहोत्यादिगणः।
(१६२) विजिगीषागतिक्रीडाव्यवहारद्युतिस्तुतीः।
दीव्यतीत्याह (१६३) गत्यां तु शोषणे स्रीव्यतीत्यदः॥१३॥
(१६४) क्रस्यति ह्वरणे दीप्तौ (१६५) व्रीडतीत्येप चोदने।
लज्जायां (१६६) चाथ हिंसायां त्वरणे चापि तूर्यते॥१४॥
(१६७) धूर्यते गूर्यते चोभे गतिहिंसनयोर्मते।
(१६८) हिंसायां च वयोहानौ घूर्यते जूर्यते पदे ॥ १५ ॥

(१६९) हिंसायां शूर्यते स्तम्भे(१७०)ऽप्यथ संराद्धिहिंसयोः ।
रध्य(१७१)त्युपक्रमज्ञानस्वीकारे प्रतिपद्यते ॥१६॥
(१७२) विक्लित्तिक्षणवृद्ध्यादौ राध्यत्येतदकर्मकम् ।
(१७३) हर्षणे मोचने दृप्य(१७४)त्यथ ग्लानौ च ताम्यति ॥१७॥
काङ्क्षायामपि(१७५)खेदे तु श्राम्यत्येष तपस्यपि ।
(१७६) मोचने क्ष्विद्यति स्नेहे(१७७)गात्रस्थौल्ये ऽपि मेद्यति ॥१८॥

इति दिवादिगणः ।

(१७८) पीडने मन्थने स्नाने सन्धाने ऽभिषुणोत्यदः ।
आत्मने (१७९) ऽप्यथ वृद्धौ च हिनोतीति गतावपि ॥१९॥
(१८०) सङ्घाते चाश्नुते व्याप्तौ(१८१)स्पृणोति प्रीतिपालने ।

इति स्वादिगणः ।

(१८२) जुषते सेवने प्रीतौ (१८३) विजते चलने भये ॥२०॥
(१८४) युद्धनिन्दादानहिंसाकत्थनेषु रिफत्यदः ।
(१८५) शब्दोपकृत्योः कुणति(१८६)चृतति ग्रन्थहिंसयोः ॥२१॥
(१८७) गतिकौटिल्यहिंसासु द्रुणती(१८८)त्यथ खण्डने ।
छेदे खुरति(१८९)भीमार्थशब्दयोर्घुरतीत्यदः ॥ २२ ॥
(१९०) ऐश्वर्यदीप्त्योः सुरति(१९१)किलति श्वैत्यखेलयोः ।
(१९२) इलति प्रेरणे स्वप्ने(१९३)प्यथाक्षेपप्रमर्दयोः ॥ २३ ॥
मुट(१९४)त्यथ कुडत्येतद्बाल्ये च घसने मतम् ।
(१९५) निवासगत्योः क्षियति(१९६)गतौ स्थैर्ये ध्रुवसदः॥२४॥

इति तुदादिगणः ।

(१९७) दीप्तिदेवनयोश्छृन्ते छृणत्तीति(१९८)तृणत्त्यदः ।
तृन्ते हिंसानादरयो(१९९)र्विनक्ति चलने भये ॥२५॥
(२००) अनक्ति म्रक्षणगतिकान्तिव्यक्तिषु कीर्तितम् ।

इति रुधादिगणः ।

(२०१) साहसिक्यप्रकथनोपयोगेषु च सेवने ॥ २६ ॥
पदं प्रकुरुते(२०२)ऽथाधिकुरुते ऽभिभवे तथा ।
क्षान्तौ(२०३)विकुरुते शब्दकर्मके ऽर्थे ऽप्यकर्मकः ॥२७॥
(२०४) ऊर्युरर्युररीभ्यश्च करोति कुरुते पदे ।
विस्ताराङ्गीकरणयोः(२०५)प्रतियत्ने तु वैकृते ॥२८॥
उपस्कुरुतइत्येतद्वाक्याध्याहारयोरपि ।
(२०६) हृष्टभक्षार्थिनीडार्थिविहंगमचतुष्पदाम् ॥ २९ ॥
आलेखने ऽपस्कुरुत आत्मनेपदमुद्विधेः ।

इति तनादिगणः ।

(२०७) कान्तितर्पणयोः प्रीणा(२०८)त्यथ श्रीणाति मिश्रणे ॥३०॥
पाके(२०९) चाथ पृणातीति पालने पूरणे ऽपि च ।
(२१०) श्रथ्नाति प्रतिहर्षे ऽपि मोचने(२११)चाथ पूरणे ॥३१॥
मुष्णाति द्रे च प्लुष्णाति मोचने स्नेहने त्रिषु ।
(२१२) गृह्णात्येतदुपादाने ज्ञाने गृह्णीतइत्यपि ॥ ३२ ॥
(२१३) अवष्टभ्नात्यवष्टभ्नोत्यन्तिकालम्बनार्थकौ ।

इति क्र्यादिगणः ।

(२१४) दर्शनाङ्कनयोर्लक्षय(२१५)त्यथोर्जयतीति तु ॥ ३३ ॥
बलप्राणनयोः (२१६) कुट्टयति च्छेदनभर्त्सने ।
(२१७) गत्यसंस्कारयोः शाठयति श्वाठयति द्वयम् ॥ ३४ ॥
(२१८) भाषाहिंसाबलादाननिकेतेषु च पञ्चसु ।
पदं तुञ्जयतीत्याह तथा पिञ्जयतीत्यपि ॥ ३५ ॥
(२१९) मण्डयत्येष भूषायां हर्षे पुस्तयतीति च ।
(२२०) स्यादादरानादरयोस्तथा बुस्तयतीत्यदः ॥ ३६ ॥
(२२१) मार्गसंस्कारगत्योः स्याद्राजयत्येतदर्थयोः ।
(२२२) ज्ञापने मारणादौ च ज्ञपयत्येतदीरितम् ॥ ३७ ॥

(२२३) छेदने पूरणे चापि वर्धयत्येतदर्थयोः।
(२२४) संश्लेषणे च ग्रहणे पदं स्पाशयते भवेत् ॥ ३८ ॥
(२२५) चेतनायां वेदयते तथाऽऽख्याने विवासने।
(२२६) निकारे चाप्युपस्कारे यातयत्येतदीरितम् ॥३९॥
(२२७) निर्यातयति वैरस्य शुद्धौ न्यासार्पणे हृतौ।
(२२८) छेदने स्नेहने चापि हरणे वासयत्यदः ॥ ४० ॥
(२२९) संपर्चने मोहने च रेचयत्यपि रेचति।
(२३०) श्रद्धायां चोपकरणे तानयत्युपतापने ॥ ४१ ॥
(२३१) शौचालंकारयोर्मार्जयति मार्जति चेरितम्।
(२३२) लवने क्षालने चार्थे स्यात्पल्पूलयतीत्यदः ॥ ४२ ॥
(२३३) वर्णक्रियायां विस्तारे गुणोक्तौ वर्णयत्यदः।

इति चुरादिगणः।

(२३४) ऋतीयते धिग्घृणयोः(२३५)पूजावृद्ध्योर्महीयते ॥४३॥
(२३६) भोजने तन्निवृत्तौ च पदं व्रतयतीत्यदः।

इति नामधातवः।

(२३७) रोषे च वैमनस्ये च मन्तूयति पदं विदुः ॥४४॥
(२३८) माधुर्यपूजयोर्वल्गूयति(२३९)स्यात्तु हृणीयते।
रोषमन्दाक्षयोः(२४०)स्वप्ने धौर्त्ये लेट्यति लोट्यति ॥४५॥

इति कण्ड्वादयः।

इत्यनेकार्थवर्गः।

अथात्मनेपदपरस्मैपदवर्गः॥

(१) भावे कर्मणि सर्वस्माद्धातोः स्यादात्मनेपदम्।
ङिञ्भ्यस्तथाऽनुदात्तेद्भ्यो भूयते प्यायतेऽयते ॥४६॥
(२) क्रियाव्यतिहृतौ तद्व्यतिस्ते व्यतिषिञ्चते।

(३) शब्दार्थहसावहहृगीतिहिंसार्थकान्न तत् ॥४७॥
व्यतिभ्यां जल्पति हसत्येति हन्तीत्यमूर्दिशः ।
नात्र संप्रवहन्ते संप्रहरन्ते निषेधनम् ॥ ४८ ॥
(४) परस्परेतरान्योन्योपपदान्नात्मनेपदम् ।
अन्योन्यस्य व्यतिलुनन्त्येषा दि(५)ङ्निपराद्विशेः ॥४९॥
(६) परिव्यवेभ्यः क्रीणाते(७)र्जयतेर्विपरापरात् ।
(८) आङो दाञो विकासस्वास्यप्रसारणयोर्न हि ॥५०॥
(९) गमेः क्षमायां णेराङि नुपृच्छ्योः(१०)क्रीडतेरनोः।
पर्याङ्भ्यांच(११)समोऽकूजे(१२)र्जिज्ञासायांशकेःसनः॥५१॥
(१३) अपास्करो(१४)ऽथो हरतेर्गतिताच्छील्य(१५)आशिषि।
नाथः(१६)शपेस्तु शपथे(१७)स्थो निर्णीतौ प्रकाशने॥५२॥
प्रतिज्ञायामावसंविप्रा (१८) दुदो ऽनूर्ध्वचेष्टने ।
(१९) देवार्चासंगतिकृतिमैत्रीषु पथिकर्तृके ॥ ५३ ॥
धात्वर्थे मन्त्रकरणे ऽकर्मके चोपपूर्वकात् ।
वा लिप्सायां(२०)समः प्रच्छिगम्यृच्छिस्पृश्रुवेत्तितः॥५४॥
दृशो ऽर्तेश्चाकर्मकेभ्य(२१)आङ्पूर्वाभ्यां यमेर्हनः ।
(२२) उद्विभ्यां तपतेः स्वाङ्गकर्मकेभ्यो(२३)ऽप्यथास्यतेः॥५५॥
ऊहश्च सोपसर्गाद्वा(२४) ह्वो निसंव्युपपूर्वकात् ।
(२५) आङस्तु स्पर्धने(२६) सूचनावक्षेपणासेवने ॥ ५६ ॥
प्रतियत्ने प्रकथनोपयोगे साधने कृञः ।
(२७) अधेः प्रसहने(२८)वेस्तु शब्दकर्मण्यकर्मकात् ॥ ५७ ॥
(२९) पूजाचार्यकृतिज्ञानोत्सञ्जनेषु भृतौ व्यये ।
नीञो विगणने(३०) कर्तृस्थिते चामूर्तकर्मणि ॥५८॥
(३१) वृत्त्युत्साहस्फीततासु क्रमे (३२) स्तद्वत्परोपयोः ।
(३३) ज्योतिरुद्गमने त्वाङो(३४) वेः पादविहृतार्थकात् ॥५९॥

(३५) आरम्भणार्थे प्रोपाभ्यां(३६)विभाषा ऽनुपसर्गकात्।
(३७) अपह्नवे ऽकर्मकाच्च ज्ञो (३८) ऽनाध्याने प्रतेः समः॥६०॥
(३९) यत्नोपसान्त्वनज्ञानासनेषूपनिमन्त्रणे।
विमतौ चापि वद्दतेः(४०)समनुभ्यां त्वकर्मकात्॥६१॥
(४१) व्यक्तवाचां सहोक्तौ च(४२)विप्रलापे विभाषया॥६२॥
(४३) सृजेः श्रद्धावति श्यंश्च यथा मालां हि सृज्यते।
(४४) ग्रो ऽवा(४५)त्समः प्रतिज्ञाने(४६)चरेरुदि सकर्मकात्॥६३॥
(४७) समस्तृतीयायुक्ता(४८)त्स्वीकरणे तूपयच्छते।
(४९) तृतीया चेच्चतुर्थ्यर्थे दाणः(५०)शिति शदे(५१)म्रॄङः॥६४॥
लुङ्लिङोश्च(५२)क्रमि प्राग्वदाप्तो यस्तु प्रयुज्यते।
(५३) सना ज्ञाश्रुस्मृदृशिभ्यो नानोज्ञ आङ्प्रतेः श्रुवः॥६५॥
(५४) अयज्ञपात्रेषु युजेरजाद्यन्तोपसर्गतः।
(५५) समः क्ष्णौते(५६)रनवने भुजेरपि च(५७)णेरणौ॥६६॥
यत्कर्मणौ स कर्ता चेद्ववेदाध्यानवर्जिते।
यथा ऽऽरोहयते हस्ती स्वयं दर्शयते नृपः॥ ६७॥
(५८) भीस्म्योः प्रयोजकाद्भीतिस्मययो(५९)र्वञ्चेर्गृधः।
प्रलम्भने(६०)लिय. पूजान्यक्कृत्योर्वञ्चने ऽपि च॥६८॥
(६१) मिथ्याशब्दोपपदतः पौनःपुन्ये कृञो णिचः।
(६२) फले च कर्त्रभिप्राये स्वरितेतो ञितो णिचः॥ ६९॥
पचते कुरुते स्नानं कटं कारयते यथा।
चुरादेरपि लक्षेयः स्वरितेत्त्वमनार्षकम्॥ ७०॥
(६३) अपाद्वदः(६४)समाङुद्भ्यो यमेरग्रन्थगोचरे।
(६५) ज्ञश्चोपसर्गरहिताच्छब्दान्तरगतौ तु वा॥ ७१॥
णिजर्थे च यजेर्नित्यं सामान्योक्तौ न तत् स्मृतम्।
यथा धरित्रीं दुदुहुः(६६)क्रमो ऽप्यनुपरापरात्॥७२॥

(६७) क्षिपो ऽभिप्रत्यतिभ्यः(६८)प्राद्वहे(६९)र्मृषिपिवह्नोः परेः ।
(७०) व्याङ्परिभ्यो रम(७१)उपाद्विभाषा चेदकर्मकः ॥७३॥
(७२) आहारचलनार्था ये गण्यन्ते ये त्वकर्मकाः ।
चित्तवत्कर्तृकास्तद्वत्तोपयत्येष पार्थिवम् ॥ ७४ ॥
(७४) प्रुद्रुसूरुबुधजनयुधेङ्नशिभ्यश्च णिचो यतः ।
(७५) न पादम्याङ्यमाङ्यसपरिमुहूरुचिवद्वसः ॥ ७५ ॥
नृतिधेट्पिबतिभ्यश्च(७६)क्यषन्ताच्च विभाषया ।
(७७) द्युतादेर्लुङि(७८)वृद्भ्यः स्यसनो(७९)र्लुटि च कल्पतेः॥७६॥
परस्मैपद(८०)मन्यस्मात्तथा शिष्टप्रयोगतः ॥७७॥

इत्यात्मनेपदपरस्मैपदवर्गः ।

इति तृतीयः काण्डः ।

आख्यातचन्द्रिका समाप्ता ॥

पदसूची ।

आ

ऊ

ऋ

ए

ख

झ

ट

ड

त

प

य

र

ल

व

श

पर्यायार्थसूची ।

ख

ग

शुद्धपाठः, पाठभेदश्च ।

१ १३ (३)निर्वर्तते संभवति सिद्धौ
३ १५ चोपलभते ऽवैति वेदयते
१६ ध्याने गारयते. (पा)
२१ कुरुते पदे. (पा)
४ ६ यावप्युपालोचते.
२० मिनुते मितौ.
२६ राध्यति चेक्षते.
५ ४ स्फूर्छति प्रस्मरत्यपि
७ प्रयुच्छति स्रंसति च.
१५ कुरुते पदे (पा).
२१ निबुन्दत्यात्म.
२४ 'घ्रातौ जिघ्रति' इति राघवनैषधीय १।४ श्लो. व्याख्याने पाठः
६ १० गार्ध्ये.
१० कक्कते गर्दयति च (पा).
२४ लज्जते च.
७ ६ शाम्यत्येवं शीकयति (पा).
१९ अपराध्यत्य.
२४ ते ऽथागृह्णा.
८ १२ गर्वेऽप्युद्धन्ति ह.
२० कृच्छ्रायते.
२१ जुगुप्सत ऋतीयते.
१० २१ श्रथ्नाति वट.
११ २३ तीत्येतद्वात्मने.
१२ २५ रोति क्रेङ्कुरो (पा).
१४ ९ 'त्याद्ध्यात्यपि' इति राघवनैषधीय १।१२३ श्लो. व्याख्यानपाठः
१६ २५ घिण्णते.
१७ १५ चत्वारि वात्मने.
१८ ६ पल्पूलयति.
२१ १३ ईरयत्यलयति.

२२ २० उच्छ्राये.
२३ ३ पन्थयतीयते.
२४ ४ 'उद्यार्थाभिधायकाः' इति राघवनैषधीय ९।३ श्लो. व्या. पाठः
२५ २३ ह्लालयति क्षालयति ह्लयति.
२६ ७ त्मने कुट्टयति पिच्छयतीति च (पा).
१९ तूर्वति थूर्वति.
२७ ३ क्राथयत्यपि यु.
४ त्युन्मूलयति. त्युन्नाटयति (पा).
६ क्षेणोति छ.
७ स्पृणातीत्यात्मनेप्य.
१२ केवालीथेवालीकेवासीमस्मसाशब्दाः
१३ आतालीवर्षालीपार्दालीमसमसाभ्रतथा.
२४ भनक्ति मोटय.
२८ २१ बद्त्येते.
२९ १० समूहति समूहते ।
२० णीते च विक्रये.
३० ४ यत्यवचौति च (पा). भवयौति च
१० स्तृणात्येतान्या
३१ ८ त्मने ऽप्य.
१२ ने चा(३८)लम्बयत्यास
३२ ८ प्रतियत्ने तु स्या
२३ र्थति च भिनत्ति द्य
३४ ४ सन्ततौ सन्त(पा).
३६ १२ त्सलोपे वा दिगूह्य(पा).
१३ क्यङित्यर्थे भृशा(पा).
३७ १९ त्मात्कृते णिचि(पा).
३८ १९ धनत्वाच्च सिध्यति(पा).
४० ५ शब्दमोचनदम्भेषु मुञ्चते शशपोरिदम(पा).
२४ शब्दं चा.
४३ २४ मन्त्रणे चार्थे ऽक(पा).
४४ ६ तौ घर्धनायां याच्ञा प्रेरणपूरणे(पा).

४५ ४ विक्लित्तीक्ष्ण, विपक्तिक्ष्ण(पा).
४६ ५ ऊर्युरर्यूररी.
१९ छेदे च कृन्तने. (पा)
४७ १७ रोषे च वै मत्सरे च. (पा)
४८ ११ गति कौटिल्य आ. (पा)
१४ र्चासङ्ककरणमै. (पा)
४९ १२ 'सनश्च स्मृदशिभ्यामननोर्श्चो ऽनाङ्प्रतेः श्रुधः' 'इ-शिभ्यां च नानोर्श्चोना' (पा)

सूच्यां तत्र तत्र निवेशनीयानि ।

आह्लादते	घ्र	२२	स्तृणाति-ते.	वै	२५
पुष्यति.	क्ष	८२	स्तृणुते.	वै	२५
समूहति-ते	वै	१२	स्पृणाति.	क्ष	८२

'संवहति-ते. वै १२' इति पङ्क्तिः परिहार्या.

सन्देहपदानि.

वर्गः. पर्यायः.

वा. १४ 'क्षिपति' इति द्विः पाठः
२७ 'संक्षेपे' इति 'संक्षिप्तौ' इति च द्विरर्थनिर्देशः
क्ष. ८२ 'रुशति' इति द्विः पाठः
८४ 'करोति वैकल्यमुदाद्भिभ्योमी' । 'करोरि वैकल्प्यमुधा मुभ्योमी' । 'करोति वैगुग्लुमुध्यतोभ्योमी' (पा)
वै. १६ सम्भवे सम्भवत्यपि.
२८ 'विनयते' इति द्विः पाठः
श्रु. १६ 'सिनाति च सिनोति च । संयच्छत्यात्मने पदं स्युः' इत्युक्तैव 'सिनुते' इत्यस्य सिद्धौ 'सिनुते च कथ्यते' इति-पुनः पाठः ॥ 'ज्ञुडत्यपि च संहृति कथ्यते' (पा)

विज्ञप्तिः ।

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते ।

२ एकस्मिन् स्तवके एक एव ग्रन्थो मुद्र्यते ।

३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण, धर्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते ।

४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच शास्त्रदृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

५ भारतवर्षीयै, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८

६ कालान्तरे प्रतिस्तवकं " " १ " ०

७ प्रापणव्ययः पृथग् नास्ति ।

८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता	(संस्कारः)	२
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः	(व्याकरणम्)	१०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् ।	(मीमांसा)	१०
(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । सम्पूर्णः ।	(वेदान्तः)	२
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः	(ज्योतिषः)	१
(६) भाट्टचिन्तामणिः महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः	(मीमांसा)	२
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र विरचिता सम्पूर्णः ।	(मीमांसा)	२
(८) ब्रह्मसूत्र भाष्यम्-वादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । सम्पूर्णः ।	(वेदान्तः)	६

(९) स्याद्वादमञ्जरी–मल्लिषेणनिर्मिता सम्पूर्णम् । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्–विशिष्टाद्वैत–ब्रह्मनिरूपणा-परम्–श्रीभाष्यकृतां परमगुरुभिः श्री ६ यामुनमुनिभिर्विरचितम् । सम्पूर्णः (वेदान्तः) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंग्रहीतः आचार्यचित्सुखमुनिविरचितव्याख्योपेतः (वेदान्तः) २

(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायरचितः । सम्पूर्णः (न्यायः) ५

(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् स० (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (वेदान्तः) १३

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्त) २

(१६) मीमांसाबालप्रकाशः (जैमिनीयद्वादशाध्यायार्थसंग्रहः) श्रीमदूपदवाक्यप्रमाणपारावारीणधुरीणमीमांसाद्वैत साम्राज्यधुरन्धरश्रीभट्टनाराणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका (प्रभाकरमतानुसारि मीमांसादर्शनम) महामहोपाध्याय श्रीशालिकनाथमिश्र विरचितम । श्रीशङ्करभट्टकृतो मीमांसासारसंग्रहश्च । सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतश्च । (वेदान्त) ३

(१९) कात्यायनश्रौतसूत्रम महामहोपाध्याय श्रीकर्काचार्यविरचित भाष्यसहितम । ९

(२०) ब्रह्मसूत्रभाष्यम् श्रीभास्कराचार्यविरचितम् (वेदान्त) १

(२१) श्रीहर्षप्रणीतम् खण्डनखण्डखाद्यम् आनन्द पूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया (विद्यासागरी) ति प्रसिद्धया समेतम् । (वेदान्त) १

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचितः । १

पत्रादिप्रेषणस्थानम्

हरिदासगुप्तः,
चौखा-संस्कृतपुस्तकालय
बनारस सिटी ।